## APPENDIX-6

## 6.1 CLASSICAL AYURVEDIC REFERENCES

# आकारकरभः, आकल्लकम् (मूलम्)

आकारकरभश्चैवाकल्लकोऽथह्यकल्लकः ।
अक्कलकरोष्णोवीर्येण बलकृत्कटुकोमतः ।
प्रतिश्यायञ्च शोथञ्च वातञ्चैव विनाशयेत् ।।

*(शलिग्राम निघण्टु हरीतक्यादिवर्ग 154)*
*सन्दर्भ*
*सो० नि० 1/688;*
*शा० म० ख० 10/23, 6/162, 12/56;*
*भावप्रकाश संहिता 1/166, 59/15, 72/76*

# अक्षोड: (-ट:) (फलमज्जा)

वातामाभिषुकाक्षोटमुकूलकनिकोचका: ।
गुरूष्णस्निग्धमधुरा: सोरुमाणा बलप्रदा: ।।
वातघ्ना बृंहणा वृष्या: कफपित्ताभिवर्धना: ।

*(च० सू० 27/157)*

वातामाक्षोडाभिषुकनिचुलपिचुनिकोचकोरुमाण प्रभृतीनि ।
पित्तश्लेष्महराण्याहु: स्निग्धोष्णानि गुरूणि च ।।
बृंहणानि अनिलघ्नानि बल्यानि मधुराणि च ।।

*(सु० सू० 46/187-188)*

.............अक्षोड .............निकोचकम् ।
........................च बृंहणं गुरुशीतलम् ।।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम् ।
स्वादुपाकरसं स्निग्धं विष्टम्भिकफशुक्रकृत् ।।

*(अ० ह० सू० 6/120-121)*

अक्षोड: पर्वतीयश्च फलस्नेहो गुडाशय: ।
कीरेष्ट: कर्परालश्च स्वादुमज्जा पृथुच्छद: ।।
अक्षोडक: स्वादुरसो मधुर: पुष्टिकारक: ।
पित्तश्लेष्मकरो बल्य: स्निग्धोष्ण: गुरुबृंहण: ।।

*(ध० नि० आम्रादिवर्ग 53,54)*

आक्षोटो वैधृतफलं कन्दलाभ: पृथुच्छद: ।
आक्षोटं मधुरं बल्यं गुरूष्णं वातहृत्सरम् ।।

*(म० नि० फलादिवर्ग 68)*

आक्षोडकं सरं स्निग्धं मधुरं रसपाकयोः ।
गुरूष्णं बृंहणं वृष्यं बल्यं विष्टम्भि रोचनम् ।।
हृद्यं क्षयास्रपवनदाहघ्नं कफपित्तलम् ।।

(कै० नि० ओषधिवर्ग 375)

अक्षोटो मधुरो बल्यो स्निग्धोष्णो वातपित्तजित् ।
रक्तदोषप्रशमनः शीतलः कफकोपनः ।।

(रा० नि० करवीरादिवर्ग 82)

पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्त्तितः ।
अक्षोटकोऽपि वातादसदृशः कफपित्तकृत् ।।
वातादः उष्णः सुस्निग्धो वातघ्नः शुक्रकृद् गुरुः ।।
वातादमज्जा मधुरो वृष्यः पित्तानिलापहः ।।
स्निग्धोष्णः कफकृन्नेष्टो रक्तपित्तविकारिणाम् ।

(भा० प्र० नि० आम्रादिवर्ग 129;124)

# आम्रात:

आम्र ...आम्रातक .....इति दशेमानि हृद्यानि भवन्ति ।

(च० सू० 4/10)

मधुरं बृंहणं बल्यमाम्रातं तर्पणं गुरु ।
सस्नेहं श्लेष्मलं शीतं वृष्यं विष्टभ्यजीर्यति ।।

(च० सू० 27/129)

बृंहणं मधुरं बल्यं गुरु विष्टभ्य जीर्यति ।
आम्रातकफलं वृष्यं सस्नेहं श्लेष्मवर्धनम् ।।

(सु० सू० 46/154)

आम्राततताल .................... मधूकजम् ।
..............................................
..............................................
..............................................
उरुमाणं प्रियालं च बृंहणं गुरु शीतलम् ।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम् ।
स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत् ।।

(अ० हृ० सू० 6/119-121)

आम्रातकफलं वृष्यं पित्तास्रकफवह्निकृत् ।
शीतं कषायं मधुरं किंचिन्मारुतकृद्गुरु ।।

(ध० नि० आम्रादिवर्ग 10)

आम्रातमामवातघ्नं गुरूष्णं रुचिकृत्सरम् ।
पक्वं स्वादु हिमं वृष्यं मरुत्पित्तक्षयास्रजित् ।।

(म० नि० फलादिवर्ग 93)

आम्रातमम्लं वातघ्नं रुच्यं पित्तकफास्रकृत् ।
सरं गुरूष्णं पक्वं तु स्वादुपाकरसं हिमम् ।

*(कै० नि० ओषधिवर्ग 410-411)*

आम्रातकं कषायाम्लमामं हृत्कण्ठहर्षणम् ।
पक्वं तु मधुराम्लाख्यं स्निग्धं पित्तकफापहम् ।।

*(रा० नि० आम्रादिवर्ग 17)*

आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्सरम् ।
पक्वन्तु तुवरं स्वादु रसे पाके हिमं स्मृतम् ।।
तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टम्भि बृंहणम् ।
गुरु बल्यं मरुत्पित्तक्षतदाहक्षयास्रजित् ।।

*(भा० प्र० नि० आम्रादिवर्ग 20)*

# अपामार्गः

प्रत्यक्पुष्पा शिरोविरेचनानाम् ।

*(च० सू० 25/40)*

अपामार्गस्तु तिक्तोष्णः कटुश्च कफनाशनः ।
अर्शः कण्डूदरामघ्नो रक्तहृद्ग्राहि वान्तिकृत् ।।

*(ध० नि० गुडूच्यादिवर्ग 262)*

अपामार्गः कटुस्तिक्तस्तीक्ष्णोष्णो दीपनः सरः ।
पाचनो वामनश्छेदी कफमेदोऽनिलापहः ।।
निहन्ति शूलहिध्मार्शोकण्डूदद्रूदरापची: ।।

*(कै० नि० ओषधिवर्ग 1033-1034)*

अपामार्गस्तु तिक्तोष्णः कटुश्च कफनाशनः ।
अर्शकण्डूदरामघ्नो रक्तहृद् ग्राहि वान्तिकृत् ।।

*(रा० नि० शताह्वादिवर्ग 91)*

अपामार्गः सरस्तीक्ष्णो दीपनस्तिक्तकः कटुः ।
पाचनो रोचनश्छर्दिकफमेदोऽनिलापहः ।।
निहन्ति हृद्रुजाध्मार्शः कण्डूशूलोदरापची: ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 220)*

# अपराजिता

अपराजिते कटू मेध्ये शीते कण्ठ्ये सुदृष्टिदे ।।
कुष्ठमूत्रत्रिदोषामशोथव्रणविषापहे ।
कषाये कटुके पाके तिक्ते च स्मृतिबुद्धिदे ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 112)*

# आर्द्रकम्

रोचनं दीपनं वृष्यमार्द्रकं विश्वभेषजम् ।
वातश्लेष्मविबन्धेषु रसस्तस्योपदिश्यते ।।

*(च० सू० 27/163)*

नागरं कफवातघ्नं ...... वृष्यं चैवार्द्रकं स्मृतम् ।

*(सु० सू० 46/226-227)*

आर्द्रकं कफानिलहरं स्वर्यं विबन्धानाहशूलजित् ।
कटूष्णं रोचनं वृष्यं हृद्यं चैवाऽऽर्द्रकं स्मृतम् ।।

*(ध० नि० शतपुष्पादिवर्ग 84)*

कटुभद्रं श्रृंगवेरमार्द्रकं कटुकन्दकम् ।
तत्तुल्यमार्द्रकं विद्यात् सुतीक्ष्णं भेदनं गुरु ।
पाचनं रोचनं वृष्यं कटूष्णं वह्निदीपनम् ।।
कफानिलहरं स्वर्यं विबन्धानाहशूलजित् ।

*(कै० नि० ओषधिवर्ग 1154, 1155)*

कटूष्णमार्द्रकं हृद्यं विपाके शीतलं लघु ।
दीपनं रुचिदं शोफकफकण्ठामयापहम् ।।

*(रा० नि० पिप्पल्यादिवर्ग 29)*

आर्द्रकं श्रृङ्गवेरं स्यात्कटुभद्रंतथाऽऽर्द्रिका ।
आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी मता ।।
कटुका मधुरा पाके रूक्षा वातकफापहा ।
ये गुणाः कथिता शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः ।।
भोजनाग्रे सदा पथ्यं लवणार्द्रक भक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ।
कुष्ठपाण्ड्वामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे ।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकम् ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 49-52)*

# अरिमेदः

तिन्दुकप्रियालबदरखदिरकदरसप्तपर्णाश्वकर्णार्जुनासनारिमेदा
इति दशेमानि उदर्दप्रशमनानि भवन्ति ।

*(च० सू० 4/17)*

सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकः .......कालीयकं चेति ।
सालसारादिरित्येषगणः कुष्ठविनाशनः ।
मेहपाण्ड्वामयहरः कफमेदोविशोषणः ।

*(सु० सू० 38/8-9)*

मुखरोगहरः शीतो रक्तामस्तम्भकारकः ।।

*(ध० नि० आम्रादिवर्ग 122)*

अरिमेदः कषायोष्णस्तिक्तो भूतविनाशकः ।
शोफातिसारकासघ्नो विषवीसर्पनाशनः ।।

*(रा० नि० शाल्मल्यादि वर्ग 42)*

इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदकः ।
इरिमेदः कषायोष्णो मुखदन्तगदाऽस्रजित् ।।
हन्ति कण्डूविषश्लेष्मकृमिकुष्ठविषव्रणान् ।।

*(भा० प्र० नि० वटादिवर्ग 34)*

# अर्जुनः

अर्जुनः ककुभः पार्थश्चित्रयोधी धनञ्जयः ।
वीरान्तकः किरीटी च नदीसर्जोऽपि पाण्डवः ।।
ककुभस्तु कषायोष्णः कफघ्नो व्रणनाशनः ।
पित्तश्रमतृषार्तिघ्नो मारुतामयकोपनः ।।

*(ध० नि० आम्रादिवर्ग 104-105)*

अर्जुनः फाल्गुनः पार्थः ककुभो धूर्तभूरुहः ।
श्वेतवाहो नदीसर्जः मधुगन्धिप्रसूनकः ।।
अर्जुनस्तुवरः शीतो जयेत् पित्तकफव्रणान् ।
मेदोमेहास्रहृद्रोगस्वेदभग्नक्षतक्षयान् ।।

*(कै० नि० ओषधिवर्ग 819-820)*

अर्जुनस्तु कषायोष्णः कफघ्नो व्रणनाशनः ।
पित्तश्रमतृषार्तिघ्नो मारुतामयकोपनः ।।

*(रा० नि० प्रभद्रादिवर्ग 118)*

ककुभोऽर्जुननामाख्यो नदीसर्जश्च कीर्तितः ।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः ।।
ककुभः शीतलो हृद्यः क्षतक्षयविषास्रजित् ।
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत् ।।

*(भा० प्र० नि० वटादिवर्ग 26-27)*

अर्जुनस्य त्वचा सिद्धं क्षीरं योज्यं हृदामये ।

*(वृन्दमाधव 31.8)*

# भल्लातकम् (फलम्)

भल्लातः कटुतिक्तोष्णो मधुरः कृमिनाशनः ।
गुल्मार्शोग्रहणीकुष्ठान् हन्ति वातकफामयान् ।।

*(ध० नि० चन्दनादिवर्ग 129)*

भल्लातकफलं पक्वं स्वादुपाकरसं गुरु ।
विष्टंभि बृंहणं रूक्षं हिमं वातबलासकृत् ।।
शुक्रलं दुर्जरं बल्यं रक्तपित्तविनाशनम् ।

*(कै० दे० नि० औषधिवर्ग 497)*

भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ।।
भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदिभेदनम् ।।
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्म शोफानाह ज्वर क्रिमीन् ।
तन्मज्जा मधुरा वृष्या बृंहणी वातपित्तहा ।
वृन्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 227-230)*

# भृङ्गराजः

भृङ्गराजः समाख्यातस्तिक्तोष्णो रूक्ष एव च ।
कफशोफामपाण्डुत्वग्हृद्रोगविषनाशनः ।।

*(ध० नि० करवीरादि वर्ग 11)*

केशराजो भृङ्गराजः सूर्यावर्तोऽथमार्कवः ।
मार्कवः कटुकस्तिक्तो रूक्षोष्णोऽक्षिशिरोऽर्त्तिहृत् ।।
कफवातहरो दन्त्यस्त्वच्यः केश्यो रसायनः ।
हन्ति कासकृमिश्वासकुष्ठशोफामपाण्डुताः ।।

*(कै० नि० ओषधिवर्ग 1574-1575)*

भृङ्गराजास्तु चक्षुष्यस्तिक्तोष्णाः केशरञ्जनाः ।
कफशोफविषघ्नाश्च तत्र नीलो रसायनः ।।

*(रा० नि० शताह्वादिवर्ग 141)*

भृङ्गरः कटुकस्तीक्ष्णो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामपाण्डुनुत् ।।
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्तिनुत् ।

*(भा० प्र० नि० गुडूच्यादि वर्ग 240-241)*

# ब्राह्मी

→ ब्राह्मी ....... इति दशेमानि प्रजास्थापनानि भवन्ति ।

*(च० सू० 4/49)*

ब्राह्मी सोमा विनिर्दिष्टा दिव्यतेजा महौषधी ।
कपोतवेगा त्वष्टा च सैव ब्रह्मसुवर्चला ।।
ब्राह्मी सौम्या रसे तिक्ता शोफपाण्डुज्वरापहा ।
दीपनी कुष्ठकण्डूघ्नी प्लीहवातबलासजित् ।।

*(ध० नि० करवीरादिवर्ग 89, 90)*

ब्राह्मी शीता सरा तिक्ता कषाया मधुरा लघुः ।
मेध्या स्वर्या स्वादुपाका हृद्यायुष्या रसायनी ।।
मतिस्मृतिप्रदा हन्ति कुष्ठकण्डूज्वरं मलान् ।
शोफारुचिविषश्वासकासमोहास्रपाण्डुताः ।।

*(कै० नि० ओषधिवर्ग 722, 723)*

ब्राह्मी हिमा कषाया च तिक्ता वातास्रपित्तजित् ।
बुद्धिं प्रज्ञां च मेधां च कुर्यादायुष्यवर्द्धनी ।।

*(रा० नि० पर्पटादिवर्ग 66)*

ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ।।
ब्राह्मी हिमासरा तिक्ता लघुर्मेध्या च शीतला ।
कषाया मधुरा स्वादुपाकाऽऽयुष्या रसायनी ।।
स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित् ।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 279-282)*

# बृहती

बृहती सिंहिका कान्ता वार्ताकी राष्ट्रिका कुली ।
सिंहिका कफवातघ्नी श्वासशूलज्वरापहा ।।
छर्दिहृद्रोगमन्दाग्निमामदोषांश्च नाशयेत् ।
बृहती ग्राहिणी सोष्णा वातघ्नी पाचनी तथा ।।

*(ध० नि० गुडूच्यादिवर्ग 93, 94)*

बृहती कटुका तिक्ता सोष्णा वातकफापहा ।
दीपनी पाचनी हृद्या ग्राहिणी ज्वरकुष्ठनुत् ।।
श्वासास्यमलवैरस्यकासारोचकशूलजित् ।

*( कै० नि० ओषधिवर्ग 50-51)*

बृहती कटुतिक्तोष्णा वातजिज्ज्वरहारिणी ।
अरोचकामकासघ्नी श्वासहृद्रोगनाशिनी ।।

*(रा० नि० शताह्वादिवर्ग 25)*

वार्ताकी क्षुद्रभण्टाकी महती बृहती कुली
हिङ्गुली राष्ट्रिका सिंही महोष्ट्री दुष्प्रधर्षिणी
बृहती ग्राहिणी हृद्या पाचनी कफवातहृत् ।
कटुतिक्ताऽऽस्यवैरस्यमलारोचकनाशिनी ।।
उष्णा कुष्ठज्वरश्वासशूलकासाग्निमान्द्यजित् ।

*(भा० प्र० नि० गुडूच्यादिवर्ग 36-37)*

# चव्यम्

चविका कोलवल्ली च चव्यं चविकमेव च ।
चव्यं च कटुकोष्णं स्याज्जन्तुहृद्दीपनं परम् ।।
कफोद्रेकहरं वातप्रकोपशमनं भवेत् ।।

*(ध० नि० शतपुष्पादिवर्ग 77)*

चव्यं कोला च चविका चव्यनं कोलवल्लिका ।
ग्रन्थि चव्यं रसे पाके कटूष्णं दीपनं लघु ।।
पित्तलं पाचनं तीक्ष्णं रूक्षं रोचनभेदनम् ।
कफवातकृमिप्लीहगुल्मानाहोदरापहम् ।।
गुल्मशूलकृमिहरं चव्यपुष्पं गरापहम् ।

*(कै० नि० ओषधिवर्ग 1173, 1174)*

चव्यं स्यादुष्णकटुकं लघु रोचनदीपनम् ।
जन्तूद्रेकापहं कासश्वासशूलार्त्तिकृन्तनम् ।।

*(रा. नि. पिप्पल्यादि वर्ग 42)*

भवेच्चव्यं तु चविका कथिता सा तथोषणा ।
कणामूलगुणं चव्यं विशेषाद् गुदजापहम् ।।

*(भा. प्र. नि० हरीतक्यादि वर्ग 67)*

# दाडिमः

चरके हृद्ये, छर्दिनिग्रहणे, श्रमहरे च महाकषाये पठ्यते ।

(च० सू० 4/10, 28, 40)

अम्लं कषायमधुरं वातघ्नं ग्राहि दीपनम् ।
स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधी च ।।
रूक्षाम्लं दाडिमं यत्तु तत् पित्तानिलकोपनम् ।
मधुरं पित्तनुत्तेषां तद्धि दाडिममुत्तमम् ।।

(च० सू० 46, 146-147)

कषायानुरसं तेषां दाडिमं नातिपित्तलम् ।
दीपनीयं रुचिकरं हृद्यं वर्चोविबन्धनम् ।
द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च ।।
त्रिदोषघ्नं तु मधुरमम्लं वातकफापहम् ।।

(सु० सू० 46/141-142)

उद्रिक्तपित्ताञ्जयति त्रीन्दोषान्स्वादु दाडिमम् ।
पित्ताविरोधि नात्युष्णमम्लं वातकफापहम् ।।
सर्वं हृद्यं लघु स्निग्धं ग्राहि रोचनदीपनम् ।।

(अ० हृ० सू० 6/117-118)

स्निग्धोष्णं दाडिमं हृद्यं कफपित्तविरोधि च ।
द्विविधं तच्च विज्ञेयं मधुरं चाम्लमेव च ।।

(ध० नि० शतपुष्पादिवर्ग 61-62)

दाडिमं दीपनं हृद्यं रोचनं नातिपित्तलम् ।

(म० नि० फलादिवर्ग 25)

स्वाद्वम्लं मधुरं चाम्लं त्रिविधं दाडिमीफलम् ।
मधुरं तु त्रिदोषघ्नं स्वाद्वम्लं वातपित्तनुत् ।
असृक्पित्तकरं चाम्लं संग्राहि सर्वमुच्यते ।।
दाडिमं रोचनं हृद्यं दीपनं नातिपित्तलम् ।
मेध्यं कण्ठास्यरोगघ्नं तर्पणं कफवातजित् ।
वर्चोविबन्धनं स्निग्धं कषायानुरसं लघु ।।

*(कै० नि० ओषधिवर्ग 306-308)*

दाडिमं मधुरमम्लकषायं कासवातकफपित्तविनाशि ।।
ग्राहि दीपनकरञ्च लघूष्णं शीतलं श्रमहरं रुचिदायि ।।

*(रा० नि० आम्रादिवर्ग 75)*

दाडिमः करको दन्तबीजो लोहितपुष्पकः ।
तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् ।।
तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ।
हृत्कण्ठमुखगन्धघ्नं तर्पणं शुक्रलं लघु ।।
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ।
स्वाद्वम्लं दीपनं रुच्यं किञ्चित्पित्तकरं लघु ।।
अम्लं तु पित्तजनकमामं वातकफापहम् ।

*(भा० प्र० नि० आम्रादिफलवर्ग 102-104)*

# दारुहरिद्रा

चरके – लेखनीये, अर्शोघ्ने, कण्डूघ्ने च महाकषाये पठ्यते ।

*(च० सू० 4/3, 12, 14)*

हरिद्रादारुहरिद्राकलशीकुटजबीजानि मधुकं चेति ।।
एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ ।
आमातिसारशमनौ विशेषाद्दोषपाचनौ ।।

*(सु० सू० 38/27-28)*

हरिद्राद्वययष्ट्याह्वकलशी कुटजोद्भवाः ।
वचाहरिद्रादिगणावामातीसारनाशनौ ।
मेदः कफाद्यपवनस्तन्यदोषनिबर्हणौ ।।

*(अ० हृ० सू० 15/35-36)*

तिक्ता दारुहरिद्रा स्याद्रूक्षोष्णा व्रणमेहजित् ।
कर्णनेत्रमुखोद्भूतां रुजं कण्डूं च नाशयेत् ।।

*(ध० नि० गुडूच्यादिवर्ग 60)*

कटङ्कटेरी पर्जन्या दार्वी दारुनिशा निशा ।
पीता दारुहरिद्रा स्यात् पीतद्रुः पीतचन्दनम् ।।
पचंपचा हेमकान्तिः पीतदारुः कटंकटी ।
(सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च)
तद्वद् दार्वी विशेषेण कर्णनेत्रास्यरोगजित् ।।

*(कै० नि० 1116-1117)*

दार्वी दारुहरिद्रा च पर्जन्या पर्जनीति च ।
कटङ्कटेरी पीता च भवेत्सैव पचम्पचा ।।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।।
पीतद्रुश्चहरिद्रुश्चपीतदारु च पीतकम् ।
दार्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 201-202)*

# द्रोणपुष्पी

भेदिनी कामलाशोफकफक्रिमिहरा कटुः ।।

*(म० नि० अभयादिवर्ग 84)*

द्रोणपुष्पी स्वादुपाका स्वादूष्णा लवणा गुरुः ।
सक्षारा कटुका रूक्षा भेदनी वातपित्तकृत् ।।
कफामकामलाशोफतमकश्वासकासजित् ।

*(कै० नि० ओषधिवर्ग 665-666(1))*

द्रोणपुष्पी कटुः सोष्णा रुच्या वातकफापहा ।
अग्निमान्द्यहरा चैव पथ्या वातापहारिणी ।।

*(रा० नि० पर्पटादिवर्ग 138)*

द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् ।
सतीक्ष्णलवणा स्वादुपाका कट्वी च भेदिनी ।।
कफामकामलाशोथतमकश्वासजन्तुजित् ।

*(भा० प्र० नि० गुडूच्यादिवर्ग 283)*

अञ्जनं कामलार्त्तानां द्रोणपुष्पीरसः शुभः ।

*(वृन्दमाधव 8/12)*

द्रोणपुष्पीरसो वापि निहन्ति विषमज्वरान् ।

*(शार्ङ्ग० म० ख० 2/1-10; भा० प्र० सं० 1-754)*

# एर्वारुः

त्रपुसैर्वारुकं स्वादु गुरू विष्टम्भि शीतलम् ।
मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति ।।
एर्वारुकं च संपक्वं दाहतृष्णाक्लमार्तिनुत् ।

*(च० सू० 27/110-111)*

एर्वारुबीजं मधुकं सदार्वि पैत्ते पिबेत्तण्डुलधावनेन ।

*(च० चि० 26/52)*

त्रपुसैर्वारुककर्कारुकशीर्णवृन्तप्रभृतीनि ।
स्वादुतिक्तरसान्याहुः कफवातकराणि च ।।
सृष्टमूत्रपुरीषाणि रक्तपित्तहराणि च ।।
..........................................
एर्वारुकं सकर्कारु संपक्वं कफवातकृत् ।
सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलम् ।।

*(सु० सू० 46/216-217,219)*

कूष्माण्ड ............एर्वारुतिण्डिशम् ।
तथा त्रपुसचीनाकचिर्भटं कफवातकृत् ।।
भेदि विष्टम्भ्यभिष्यन्दि स्वादुपाकरसं गुरु ।

*(अ० हृ० सू० 6/87)*

एर्वारुः कर्कटी प्रोक्ता कथ्यन्ते तद्गुणा अथ ।
कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।।
रुच्या पित्तहरा सामा पक्वा तृष्णाऽग्निपित्तकृत् ।

*(भा० प्र० नि० शाकवर्ग 60-61)*

# गजपिप्पली (फलम्)

गजपिप्पलिका स्वादुः कटुरुष्णा च कीर्तिता ।
बलासं हन्ति वातेन सार्धं जन्तुजयप्रदा ।।

*(ध० नि० शतपुष्पादिवर्ग 79)*

हस्तिकृष्णा कटुः पाके वीर्योष्णा दीपनी कटुः ।।
वातश्लेष्मकृमिश्वासकण्ठरोगातिसारजित् ।

*(कै० नि० ओषधिवर्ग 1176-1177)*

गजोषणा कटूष्णा च रूक्षा मलविशोषणी ।
बलासवातहन्त्री च स्तन्यवर्णविवर्द्धिनी ।।

*(रा० नि० पिप्पल्यादि वर्ग 15)*

गजकृष्णा कटुर्वातश्लेष्महृद्वह्निवर्धिनी ।
उष्णा निहन्त्यतीसारं श्वासकण्ठामयक्रिमीन् ।।

*(भा० प्र० नि० हरीतक्यादि वर्ग 69)*

# गम्भारी (फलम्)

काश्मर्यफलं रक्तसांग्राहिकरक्तपित्तप्रशमनानाम् ।

*(च० सू० 25/39)*

सारिवा .....काश्मरीफल ....उशीरं चेति ।<br>
सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः ।<br>
पित्तज्वरप्रशमनो विशेषाद्दाहनाशनः ।।

*(सु० सू० 38/39-40)*

मधुककाश्मर्यपलाशतैलानि मधुरकषायाणि कफपित्तप्रशमनानि ।

*(सु० सू० 45/121)*

हृद्यं मूत्रविबन्धघ्नं पित्तासृग्वातनाशनम् ।<br>
केश्यं रसायनं मेध्यं काश्मर्यं फलमुच्यते ।।

*(सु० सू० 46/184(2)-185(1))*

फलं तु ........ सरं काश्मर्यजं हिमम् ।<br>
शकृन्मूत्रविबन्धघ्नं केश्यं मेध्यं रसायनम् ।।

*(अ० हृ० सू० 6/122(1)-123(1))*

गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।<br>
काश्मीरी काश्मरी हीरा काश्मर्यः पीतरोहिणी ।।<br>
तत्फलं बृंहणं वृष्यं गुरु केश्यं रसायनम् ।

*(भा० प्र० नि० गुडूच्यादिवर्ग 15, 17)*

# गाङ्गे०रुकी (पादपम्), गाङ्गे०रुकं (फलम्)

गाङ्गेरुकं ......मधुरं सकषायं च शीतं पित्तकफापहम् ।

*(च० सू० 27/139(2))*

....गाङ्गेरुकी पुष्करवर्तिबिल्वबिम्बीप्रभृतीनि ।।
फलान्येतानि शीतानि कफपित्तहराणि च ।
संग्राहकाणि रूक्षाणि कषायमधुराणि च ।।

*(सु० सू० 46/163-164)*

सकषायं हिमं स्वादु धान्वनं कफवातजित् ।
तद्वद्गाङ्गेरुकं विद्यादश्मन्तकफलानि च ।।

*(सु० सू० 46/170)*

गाङ्गेरुकी नागबला खरगन्धिनिका झषा ।
विश्वदेवा तथारिष्टा खण्डा ह्रस्वगवेधुका ।।
गाङ्गेरुकी मधुराम्ला कषायोष्णा गुरुस्तथा ।
कटुस्तिक्ता च वातघ्नी व्रणपित्तविकारजित् ।

*(ध० नि० गुडूच्यादिवर्ग 284-285)*

खड्गांदच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।
गाङ्गेरुकीमूलरसैर्जायते गतवेदनः ।।

*(शालि० म० ख० 1/24)*

# गुञ्जा (मूलम्)

गुञ्जाद्वयं च शीतोष्णं बीजं वान्तिकरं शिफा ।
शूलघ्नी विषहृत्पत्रं वश्ये श्वेता प्रशस्यते ।।

*(ध० नि० करवीरादि वर्ग 32)*

गुञ्जाऽनुष्णा रसे तिक्ता कषाया कफपित्तहा ।।
चक्षुष्या शुक्रला केश्या त्वच्या रुच्या बलप्रदा ।
इन्द्रलुप्तहरा तीव्रा सविषा मदमोहकृत् ।।
हन्ति रक्षोग्रहविषकण्डूकुष्ठव्रणकृमीन् ।

*(कै० नि० ओषधिवर्ग 795-797(1))*

गुञ्जाद्वयं तु केश्यं स्याद्वातपित्तज्वरापहम् ।।
मुखशोषभ्रमश्वासतृष्णामदविनाशनम् ।।
नेत्रामयहरं वृष्यं बल्यं कण्डूं व्रणं हरेत् ।
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलाऽपि ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 126-128)*

# इक्षुः

सारिवेक्षुमूलमधुक ...... कण्टकारिका इति दशेमानि कण्ठ्यानि भवन्ति

*(च० सू० 4/9)*

वृष्यः शीतः स्थिरः स्निग्धो बृंहणो मधुरो रसः ।
श्लेष्मलो भक्षितस्येक्षोर्यान्त्रिकस्तु विदह्यते ।।

*(च० सू० 27/234)*

अविदाही कफकरो वातपित्तनिबर्हणः ।
वक्त्रप्रह्लादनो वृष्यो दन्तनिष्पीडितो रसः ।।
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्तितः ।

*(सु० सू० 45/157-158)*

इक्षुः शीतो गुरुः स्निग्धो मधुरो रसपाकयोः ।
जीवनो बृंहणः वृष्यः कृमिमूत्रकफप्रदः ।।
सरः संतर्पणो बल्यो ह्लादी पित्तास्त्रनाशनः ।
ओजस्यो वातजित् भुक्तमात्रे वातप्रकोपणः ।।

*(कै० नि० ओषधि वर्ग 139-140)*

इक्षुदीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः ।।
इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः ।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः ।।

*(भा० प्र० नि० इक्षुवर्ग 792)*

# इन्द्रवारुणी (मूलम्)

चरके - विरेचनद्रव्येषु मूलं पठ्यते ।

(च० सू० 1/76, 78; 2/8) :

सुश्रुते - विरेचनद्रव्येषु मूलं पठ्यते ।

(सु० सू० 38/29 ; 39/4)

इन्द्रवारुणिकाऽत्युष्णा रेचनी कटुका तथा ।
कृमिश्लेष्मव्रणान्हन्ति हन्ति सर्वोदराण्यपि ।।

(ध० नि० गुडूच्यादि वर्ग 249)

ऐन्द्रवारुद्वयं तिक्तं कटुपाके सरं लघु ।
वीर्योष्णं कामलापित्तकफप्लीहोदरापहम् ।।

(म० नि० अभयादिवर्ग 22)

श्वासकासापचीकुष्ठप्लीहानाहगरोदरम् ।
कामलामूढगर्भाश्मग्रन्थिगण्डामयं विषम् ।।

(कै० नि० ओषधिवर्ग 1027-1028)

इन्द्रवारुणिका तिक्ता कटुशीता च रेचनी ।
गुल्मपित्तोदरश्लेष्म कृमिकुष्ठज्वरापहा ।।

(रा० नि० गुडूच्यादि वर्ग 72)

ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
..............................................
गवादनीद्वयं तिक्तं पाके कटु सरं लघु ।।
वीर्योष्णं कामलापित्तकफप्लीहोदरापहम् ।
श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत् ।।
प्रमेहमूढगर्भामगण्डामयविषापहम् ।

(भा० प्र० गुडूच्यादि वर्ग 203-206)

# जम्बूः, जाम्बवम् (फलम्)

कषायमधुरप्रायं गुरु विष्टम्भि शीतलम् ।
जाम्बवं कफपित्तघ्नं ग्राहि वातकरं परम् ।

*(च० सू० 27/140)*

चरके - छर्दिनिग्रहणे (पल्लवं), पुरीषविरजनीये, मूत्रसंग्रहणीये च महाकषाये पठ्यते ।

*(च० सू० 4/28, 32, 33)*

जाम्बवं वातजननानां ...... अग्र्यं

*(च० सू० 25/39)*

अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित् ।

*(सु० सू० 46/165)*

जाम्बवं वातलं ग्राहि स्वाद्वम्लं कफपित्तजित्
हृत्कण्ठकर्षणं चान्यत् कषायं क्षुद्रजाम्बवम् ।

*(ध० नि० आम्रादिवर्ग 78)*

जम्बूः कषायमधुरा श्रमपित्तदाहकण्ठार्तिशोषशमनी कृमिदोषहन्त्री ।
श्वासातिसारकफकासविनाशनी च विष्टम्भिनी भक्षति रोचनपाचनी च ।।

*(रा० नि० आम्रादिवर्ग 129)*

फलेन्द्रा कथिता नंदी राजजम्बूर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ।
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ।।
क्षुद्रजम्बुः सूक्ष्मपत्रा नादेयी जलजम्बुका ।
जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित् ।।

*(भा० प्र० नि० आम्रादिफलवर्ग 69-70)*

ग्राही कषायस्तन्मज्जा विशेषान्मधुमेहहा ।

*(नि० र०     )*

तद्वदजाक्षीरसमो जम्बूत्वगुद्भवो रसः ।

*(चक्रदत्त 64/46)*

# जयपालः

रेचको जयपालश्च सारकस्तितत्तिरीफलम् ।
दन्तीबीजं मलद्रावी निकुभ्मो बीजरेचकः ।।
कुम्भीबीजं निकुभ्माच बीजं तत्कुम्भिनीफलम् ।।
जेपालः कटुरुष्णश्च कृमिहारी विरेचनः ।
दीपनः कफवातघ्नो जठरामयशोधनः (जलोदरविनाशनः-पाठा.) ।।

*(ध० नि० गुडूच्यादिवर्ग 227-228)*

जयपालो दन्तिबीजं विख्यातं तिन्तिडीफलम् ।
जयपालो गुरुः स्निग्धो रेची पित्तकफापहः ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 201)*

शार्धिरे - उदररोगे जैपालः पठितः ।

*(शार्ङि म० ख० 12/228)*

# जयन्ती

विषघ्नी तिक्तकटुका कफपित्तसमीरजित् ।
अपराजिता केशरुहा तथा चैव नियोजिता ।।
विजयानागदमनी निःशेषविषनाशिनी ।
विषमोहप्रशमनी महायोगेश्वरीति च ।।

*(ध० नि० करवीरादि वर्गान्ते 3)*

बलामोटा सूक्ष्ममूला जयन्ती विजया जया ।
हरिता चैव विज्ञेया सूक्ष्मपत्राऽपराजिता ।।
बलामोटा कटुस्तिक्ता लघुः पित्तकफापहा ।
मूत्रकृच्छ्रं विषं हन्ति विवादे कुरुते जयम् ।।

*(कै० नि० ओषधिवर्ग 1111-1112)*

जयन्ती तु बलामोटा हरिता च जया तथा ।
विजया सूक्ष्ममूला च विक्रान्ता चापराजिता ।।
ज्ञेया जयन्ती गलगण्डहारी तिक्ता कटूष्णाऽनिलनाशनीच ।
भूतापहा कण्ठविशोधनी च कृष्णा तु सा तत्र रसायनी स्यात् ।।

*(रा० नि० शताह्वादिवर्ग 131-132)*

श्वेतजयन्तीमूलं पीतं पिष्टं च पयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा ।।

*(भै० र० कुष्ठरोग 44)*

# ज्योतिष्मती

ज्योतिष्मती....इति दशेमानि शिरोविरेचनोपगानि भवन्ति ।

*(च० सू० 4/27)*

ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् ।
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ।।

*(ध० नि० गुडूच्यादि वर्ग 269)*

ज्योतिष्मती तु सुस्निग्धा तिक्तोष्णाकटुकासरा ।
कषाया वामनी तीक्ष्णा मोहमेधाक्षिवर्णदा ।।
कफानिलहरा हन्ति व्रणवीसर्पपाण्डुता ।।

*(कै० नि० ओषधिवर्ग 716-717)*

ज्योतिष्मती तिक्तरसा च रूक्षा किञ्चित्कटुर्वातकफापहा च ।
दाहप्रदा दीपनकृच्च मेध्या प्रज्ञाञ्च पुष्णाति तथा द्वितीया ।।

*(रा० नि० गुडूच्यादि वर्ग 86)*

कटु ज्योतिष्मतीतैलं तिक्तोष्णं वातनाशनम् ।
पित्तसंतापनं मेधाप्रज्ञाबुद्धिविवर्धनम् ।।

*(रा० नि० क्षीरादिवर्ग 15/19)*

ज्योतिष्मती स्यात्कटभी ज्योतिष्का कर्ङ्गिनीति च ।
पारावतपदीपिण्या लता प्रोक्ता ककुन्दनी ।।
ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् ।
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 171-172)*

# कदम्ब:

चरके शुक्रशोधने, वेदनास्थापने च महाकषाये पठ्यते

(च० सू० 4/20,47)

लोध्र ......कदम्बसाला: कदली चेति ।
एषरोध्रादिरित्युक्तो मेद:कफहरो गण: ।।
योनिदोषहर: स्तम्भी वर्ण्यो विषनाशन: ।

(सु० सू० 38/14,15)

न्यग्रोध .... कदम्ब ... नन्दीवृक्षश्चेति ।
न्यग्रोधादिर्गणो व्रण्य: संग्राही भग्नसाधक: ।।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ।

(सु०सू० 38/48-49)

कदम्बस्तु कषाय: स्याद्रसे शीतो गुणेऽपि च ।
व्रणसंरोहणश्चापि कासदाहविषापह: ।।

(ध० नि० आम्रादिवर्ग 96)

कदम्ब: शिशिरो ग्राही कषायो लवणो गुरु: ।
निहन्ति योनिदोषास्रकृच्छ्रदाहविषव्रणान् ।।

(कै० नि० ओषधिवर्ग 957)

कदम्बस्तिक्तकटुक: कषायो वातनाशन: ।
शीतल: कफपित्तार्त्तिनाशन: शुक्रवर्द्धन: ।।

(रा० नि० प्रभदाद्रि वर्ग 98)

कदम्बो मधुर: शीत: कषायो लवणो गुरु: ।
सरो विष्टम्भकृद्रूक्ष: कफस्तन्यानिलप्रद: ।।

(भा० प्र० नि० पुष्पवर्ग 36)

# काकमाची

त्रिदोषशमनी वृष्या काकमाची रसायनी ।
नात्युष्णशीतवीर्या च भेदिनी कुष्ठनाशिनी ।।

*(च० सू० 27/89)*

मण्डूकपर्णी....काकमाची.....अर्कपुष्पी प्रभृतीनि ।
रक्तपित्तहराण्याहुर्हृद्यानि सुलघूनि च ।।

*(सु० सू० 46/262-263)*

ईषत्तिक्तं त्रिदोषघ्नं शाकं कटु सतीनजम् ।
नात्युष्णशीतं कुष्ठघ्नं काकमाच्यास्तु तद्विधम् ।।

*(सु० सू० 46/266)*

काकमाची त्रिदोषघ्नी सरा स्वर्या च तिक्तका ।
हन्ति दोषत्रयं कुष्ठं वृष्या सोष्णा रसायनी ।।

*(ध० नि० करवीरादिवर्ग 18,19)*

काकमाची कटुस्तिक्ता सोष्णा स्निग्धा रसायनी ।
हृद्या वृष्या सरा स्वर्या त्रिदोषघ्नी लघुर्जयेत् ।।
कुष्ठशोफप्रमेहार्श:श्वासकासारुचिज्वरान् ।।
कटुर्नेत्रहिता हिक्काछर्दिहृद्रोगनाशिनी ।।

*(कै० नि० ओषधिवर्ग 710, 711)*

काकमाची कटुस्तिक्ता रसोष्णा कफनाशनी ।
शूलार्श:शोफदोषघ्नी कुष्ठकण्डूतिहारिणी ।।

*(रा० नि० शताह्वादिवर्ग 35)*

काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा ।
तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् ।।
कटुर्नेत्रहिता हिक्काच्छर्दिहृद्रोगनाशिनी ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 246, 247)*

# कमलम् (पुष्पम्)

पद्मोत्पलनलिन ......इति दशेमानि मूत्रविरजनीयानि भवन्ति ।

*(च० सू० 4/34)*

उत्पलरक्तोत्पलकुमुदसौगन्धिककुवलयपुण्डरीकाणि मधुकं चेति ।
उत्पलादिरयं दाहपित्तरक्तविनाशनः ।
पिपासाविषहृद्रोगच्छर्दिमूर्च्छाहरो गणः ।

*(सु० सू० 38/52-53)*

वीर्ये रक्तोत्पलं शीतं तिक्तं च मधुरं रसे ।
भिनत्ति पित्तसन्तापौ ध्वंसयत्यस्रजां रुजम् ।।

*(ध० नि० करवीरादिवर्ग 135, 139)*

कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृषादाहास्रविस्फोटविषवीसर्पनाशनम् ।।

*(म० नि० कर्पूरादिवर्ग 79)*

कमलं शीतलं तिक्तं कषायं स्वादु वर्णकृत् ।
कफपित्तास्रविस्फोटदाहतृष्णाविनाशनम् ।।

*(कै० नि० ओषधिवर्ग 1445)*

कमलं शीतलं स्वादु रक्तपित्तश्रमार्तिनुत् ।
सुगन्धि भ्रान्तिसन्तापशान्तिदं तर्पणं परम् ।।

*(रा० नि० करवीरादिवर्ग 175)*

कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्त्रविस्फोटविषवीसर्पनाशनम् ।।

*(भा० प्र० नि० पुष्पवर्ग 3)*

संवर्त्तिका हिमातिक्ता कषाया दाहतृट्प्रणुत् ।
मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ।।
मृणालं शीतलं वृष्यं पित्तदाहास्त्रजिद् गुरु ।
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ।।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् ।।

*(भा० प्र० नि० पुष्पवर्ग 5, 9, 12,*

पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षं च गर्भसंस्थापकं परम् ।।
कफवातहरं बल्यं ग्राहि पित्तास्त्रदाहनुत् ।

*(भा० प्र० नि० फलवर्ग 89-90)*

# कपित्थः (फलम्)

कपित्थमामं कण्ठघ्नं विषघ्नं ग्राही वातलम् ।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम् ।।
परिपक्वं तु दोषघ्नं विषघ्नं ग्राहि गुर्वपि ।।

*(च० सू० 27/133,134)*

आमं कपित्थमकण्ठ्यानाम् ।

*(च० सू० 25/39)*

कपित्थमाममस्वर्यं कफघ्नं ग्राहि वातलम् ।
कफानिलहरं पक्वं मधुराम्लं रसं गुरु ।।
श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनम् ।

*(सु० सू० 46/147, 148; ध० नि० शतपुष्पादिवर्ग 99, 100)*

आमं कपित्थं संग्राहि कषायं लघु लेखनम् ।।
रूक्षाम्लं विषकण्ठघ्नं कफजित् वातपित्तकृत् ।
पक्वं गुरु कषायाम्लं स्वादु हिक्कात्रिदोषजित् ।।
वमिकासतृषाश्वासशमनं कण्ठशोधनम् ।
संग्राहि रोचनं हृद्यं दुर्जरं मूत्रदोषजित् ।।

*(कै० नि० ओषधिवर्ग 414-416)*

कपित्थो मधुराम्लश्च कषायस्तिक्तशीतलः ।
वृष्यः पित्तानिलं हन्ति संग्राही व्रणनाशनः ।।

*(रा० नि० शतपुष्पादिवर्ग 156)*

कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः ।
कपिप्रियो दधिफलस्तथा दन्तशठोऽपि च ।।
कपित्थमामं संग्राहि कषायं लघु लेखनम् ।
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ।।
स्यादम्लं तुवरं कण्ठशोधनं ग्राहि दुर्जरम् ।।

*(भा० प्र० नि० आम्रादिफलवर्ग 61-62)*

# करमर्दः

....करमर्द ..... मातुलुङ्गनीति दशेमानि हृद्यानि भवन्ति ।

*(च० सू० 4/10)*

अम्लं तृषापहं रुच्यं पित्तकृत् करमर्दकम् ।

*(सु० सू० 46/156)*

गुरूष्णवीर्यं वातघ्नं सरं सकरमर्दकम् ।।
नातिपित्तकरं पक्वं शुष्कं च करमर्दकम् ।।

*(अ० हृ० सू० 6/136,138)*

अम्लं तृष्णापहं रुच्यं पित्तकृत्करमर्दकम् ।
पक्वं च मधुरं शीतं रक्तपित्तहरं मतम् ।।

*(ध० नि० आम्रादिफलवर्ग 93)*

करमर्दं गुरूष्णाम्लं रुच्यं पित्तकफास्रकृत् ।।
तृड्वातजित् सरं पक्वं लघु स्वादु कफास्रजित् ।
शुष्कं पक्ववदप्यामं पक्वमप्यार्द्रमामवत् ।।

*(कै० नि० ओषधिवर्ग 372-373)*

करमर्दः सतिक्ताम्लो बालो दीपनदाहकः ।
पक्वस्त्रिदोषशमनोऽरुचिघ्नो विषनाशनः ।।

*(रा० नि० आम्रादिफलवर्ग 208)*

करमर्दः सुषेणः स्यात्कृष्णपाकफलस्तथा ।
तस्माल्लघुफला या तु सा ज्ञेया करमर्दिका ।।
करमर्दद्वयं त्वाममम्लं गुरु तृषाहरम् ।
उष्णं रुचिकरं प्रोक्तं रक्तपित्तकफप्रदम् ।।
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ।।

*(भा० प्र० नि० आम्रादिफलवर्ग 81-82)*

# करञ्जः

चरके विरेचनद्रव्येषु (सू० 2/8), कण्डूघ्ने महाकषाये च (सू० 4/14) पठ्यते । सुश्रुते आरग्वधादिगणे, वरुणादिगणे, अर्कादिगणे, श्यामादिगणे, शिरोविरेचने (सू० 39/3) तथा श्लेष्मसंशमने वर्गे (सू० 39/9) च करञ्जः पठ्यते ।

आरग्वधादिरित्येष गणः श्लेष्मविषापहः ।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः ।।

*(सु० सू० 38/6-7)*

वरुणादिर्गणो ह्येष कफमेदोनिवारणः ।।
विनिहन्ति शिरःशूलगुल्माभ्यन्तरविद्रधीन् ।

*(सु० सू० 38/10-11)*

उक्तः श्यामादिरित्येष गणो गुल्मविषापहः ।।
आनाहोदरविड्भेदी तथोदावर्त्तनाशनः ।

*(सु० सू० 38/29-30)*

करञ्जकिंशुकअरिष्टफलं जन्तुप्रमेहजित् ।

*(सु० सू० 46/197)*

करञ्जो नक्तमालश्च पूतीकश्चिरबिल्वकः ।
करञ्जश्चोष्णतिक्तः स्यात् कफपित्तास्रदोषजित् ।
व्रणप्लीहकृमीन् हन्ति भूतघ्नो योनिरोगहा ।।
चिरबिल्वः करञ्जश्च तीव्रो वातकफापहः ।

*(ध० नि० आम्रादिवर्ग 97, 98)*

करञ्जः कटुकः पाके रसे तिक्तकषायकः ।
कटुको गुणतस्तीक्ष्णो वीर्योष्णो विनियच्छति ।।

बलासपित्तकुष्ठास्रव्रणमेदोदरक्रिमीन् ।

*(कै० नि० ओषधिवर्ग 964-966)*

करञ्जः कटुरुष्णश्च चक्षुष्यो वातनाशनः ।
तस्यस्नेहोऽतिस्निग्धश्च वातघ्नः स्थिरदीप्तिदः ।।

*(रा० नि० प्रभद्रादिवर्ग 62)*

करञ्जो नक्तमालश्च करजश्चिरबिल्वकः ।
करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषहृत् ।।
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 119-120)*

# कारवेल्लकः (कारवेल्ली) (–ल्लकम्)

कफवातहरं तिक्तं रोचनं कटुकं लघु ।
वार्ताकं दीपनं प्रोक्तं जीर्णं सक्षारपित्तलम् ।।
तद्वत् कर्कोटकं विद्यात् कारवेल्लकमेव च ।

*(सु० सू० 46/269)*

कारवेल्लं सकटुकंदीपनं कफजित्परम् ।

*(अ० ह० सू० 6/80)*

कारवेल्लं सकटुकं कटुपाकमवातलम् ।।
दीपनं भेदनं तिक्तमवृष्यमहिमं लघु ।
हन्त्यरोचकपित्तास्रकफं पाण्डुव्रणकृमीन् ।।
श्वासकासप्रमेहास्रकोठकुष्ठज्वरानपि ।

*(कै० नि० ओषधिवर्ग 589-591)*

कारवल्ली सुतिक्तोष्णा दीपनी कफवातजित् ।
अरोचकहरा चैव रक्तदोषहरी च सा ।।

*(रा० नि० मूलकादिवर्ग 186)*

कारवेल्लं कठिल्लं स्यात्कारवेल्ली ततो लघुः ।
कारवेल्लं हिमं भेदि लघुतिक्तमवातलम् ।।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत् ।
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः ।

*(भा० प्र० नि० शाकवर्ग 63-64)*

# कटुका

चरके लेखनीये, भेदनीये, स्तन्यशोधने च महाकषाये पठ्यते

(च० सू० 4/3,4,18)

पिप्पली ......... कटुरोहिणी चेति ।
पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः ।।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः ।।

(सु० सू० 38/23)

पटोल ........ कटुरोहिणी चेति ।
पटोलादिर्गणः पित्तकफारोचकनाशनः ।।
ज्वरोपशमनो व्रण्यश्छर्दिकण्डूविषापहः ।

(सु० सू० 38/34)

मुस्ता .........कटुरोहिणी ...... चित्रकश्चेति ।
एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः ।
योनिदोषहरः स्तन्यशोधनः पाचनस्तथा ।।

(सु० सू० 38/55)

कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी ।
आमघ्नी शतपर्वा च विप्रार्णि जननी जना ।
कटुका पित्तजित्तिक्ता कटुः शीतास्रदाहजित् ।
बलासारोचकान् हन्ति विषमज्वरनाशिनी ।।

(ध० नि० गुडूच्यादिवर्ग 37-38)

कटुका जननी तिक्ता .......आमघ्नी पञ्चविंशतिः ।
कटुकाऽतिकटुस्तिक्ता शीतपित्तास्रदोषजित् ।।
बलासारोचकश्वासज्वरहृद्रेचनी च सा ।

(रा० नि० गुडूच्यादिवर्ग 54-57)

कट्वी तु कटुका तिक्ता कृष्णभेदा कटम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ।
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ।
कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः ।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठक्रिमिप्रणुत् ।

*(भा० प्र० नि० हरीतक्यादिवर्ग 151-152)*

# कोकिलाक्षः

चरके शुक्रशोधने महाकषाये पठ्यते ।

(च० सू० 4/20)

स्वयंगुप्तेक्षुरकयोः फलचूर्णं सशर्करम् ।
धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत् ।।

(सु० चि० 26/33)

कोकिलाक्षकनिर्यूहः पीतस्तच्छाकभोजिना ।
कृपाभ्यास इव क्रोधं वातरक्तं नियच्छति ।।

(अ० हृ० चि० 22/18-19)

शोथनुत् कोकिलाक्षस्य भस्म मूत्रेण वाम्भसा ।

(चक्रदत्त 39/23)

कोकिलाक्षो हिमस्तिक्तः स्वाद्वम्लः स्निग्धपिच्छिलः ।।
वृष्यो वातामवाताश्मतृष्णादृष्टिखुडास्रजित् ।।
इक्षुरस्य दलं स्वादु तिक्तं शोफविषापहम् ।
शूलपाण्डूदरानाहवातमूत्रविबन्धनुत् ।।

(कै० नि० ओषधिवर्ग 1091-1092)

कोकिलाक्षस्तु मधुरः शीतः पित्तातिसारनुत् ।
वृष्यः कफहरो बल्यो रुच्यः सन्तर्पणः परः ।।

(रा० नि० शताह्वादिवर्ग 193)

कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः ।
भिक्षुः काण्डेक्षुरप्युक्तः इक्षुगन्धेक्षुबालिका ।।

क्षुरकः शीतलो वृष्यः स्वाद्वम्लः पिच्छिलस्तथा ।
तिक्तो वातामशोथाश्मतृष्णादृष्ट्यनिलास्रजित् ।।

(भा० प्र० नि० गुडूच्यादिवर्ग 224-225)

# (कजुपा) (लोणिका) बृहल्लोणी

सर्वाणि सूप्यशाकानि ............................
.....................................................
लोणिका ............................ पीलुपर्णिका ।
शाकं गुरु च रूक्षं च प्रायो विष्टभ्य जीर्यति ।।
मधुरं शीतवीर्यं च पुरीषस्य च भेदनम् ।
स्विन्नं निष्पीडितरसं स्नेहाढ्यं तत्प्रशस्यते ।।

*(च० सू० 27/96-101)*

लोणिका ................ कुरण्टिका प्रभृतयः ।
स्वादुपाकरसाः शीताः कफघ्ना नातिपित्तलाः ।
लवणानुरसा रूक्षाः सक्षारा वातलाः सराः ।।

*(सु० सू० 46/274-275)*

लोणिका कटुका रूक्षा वातश्लेष्महरा गुरुः ।
अर्शोघ्नी दीपनी चुक्रा मन्दाग्निविषनाशिनी ।।

*(कै० नि० ओषधिवर्ग 649)*

घोटिकाऽम्ला सराचोष्णा वातकृत्कफपित्तहृत् ।।
वाग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ।
शोथे लोचनरोगे च हिता तज्ज्ञैरुदाहृता ।।

*(भा० प्र० नि० शाकवर्ग 21, 22)*

# लज्जालुः

चरके सन्धानीये, पुरीषसंग्रहणीये च महाकषाये पठ्यते ।

(च० सू० 4/5,31)

सुश्रुते प्रियंग्वादिगणे, अम्बष्ठादिगणे च समर्ङ्गा नाम्ना लज्जालुः पठ्यते

(सु० सू० 38/45-46)

गणौ प्रियंग्वम्बष्ठादौ पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानां चापि रोपणौ ।।

(सु० सू० 38/47)

रक्तपादी कटुः शीता पित्तातीसारनाशिनी ।
शोफदाहश्रमश्वास व्रणकुष्ठकफास्रनुत् ।।

(ध० नि० करवीरादिवर्ग 110)

नमस्करी रक्तपादा समंगाऽञ्जलिकारिका ।
शामीपत्रा रक्तमूला रुहा खदिरकारुणा ।।
लज्जालुः स्यात् स्पृहा स्पृक्का गन्धकारी प्ररोचनी ।
नमस्करी हिमा तिक्ता कषाया कफपित्तहा ।।
योनिरोगमतीसारं रक्तपित्तं च नाशयेत् ।

(कै० नि० ओषधिवर्ग 1081, 1082)

लज्जालुः स्याच्छमीपत्रा समङ्गा जलकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ।।
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् ।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ।।

(भा० प्र० नि० गुडूच्यादि वर्ग 272-273)

# मधूकः

द्राक्षाकाश्मर्य मधूकपुष्पखर्जूरप्रभृतीनी ।
रक्तपित्तहराण्याहुर्गुरूणि मणुराणि च ।।
बृहंणीयमहृद्यं च मधूककुसुमं गुरु ।
वातपित्तोपशमनं फलं तस्योपदिश्यते ।।

*(सु० सू० 46/182, 183(1), 186)*

मधूकं मधुरं शीतं पित्तदाहश्रमापहम् ।
वातलं न तु दोषघ्नं वीर्यपुष्टिविवर्धनम् ।।
बृंहणीयमहृद्यं च मधूककुसुमं गुरु ।

*(ध० नि० आम्रादिवर्ग 40-41)*

तत्पुष्पं मधुरं शीतमहृद्यं बृंहणं गुरु ।।
(बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम्)
स्निग्धं विकासि तीक्ष्णोष्णं तत्फलं गुरुशीतलम् ।।
अहृद्यं शुक्रलं स्निग्धं मधुरं रसपाकयोः ।।
विष्टम्भिः बृंहणं बल्यं कफकृत्मारुतापहम् ।
हन्ति पित्तास्रतृड्दाहश्वासकासक्षतक्षयान् ।।

*(कै० नि० ओषधिवर्ग 458-460)*

मधुकं मधुरं शीतं पित्तदाहश्रमापहम् ।
वातलं जन्तुदोषघ्नं वीर्यपुष्टिविवर्द्धनम् ।।

*(रा० नि० आम्रादिवर्ग 92)*

मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ।।
मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ।।
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ।।
अहृद्यं हन्ति तृष्णाऽस्रदाहश्वासक्षतक्षयान् ।।

*(भा० प्र० नि० आम्रादिफलवर्ग 95-97)*

# मत्स्याक्षी

चरके ऐन्द्ररसायने पठ्यते ।

*(च० चि० 1/3/24)*

सुश्रुते मेध्यलेहे पठ्यते ।

*(सु० शा० 10/68)*

मत्स्याक्षिका मत्स्यगन्धा बाह्ली नाडीकलायकः ।।
मत्स्यादनी तु गण्डाली तथा गर्तकलम्बुकः ।।
बाह्ली तिक्ता स्वादुशीता कषाया ग्राहिणी लघुः ।।
वातला कटुका पाके कफपित्तास्रकुष्ठजित् ।।

*(कै० नि० ओषधिवर्ग 728, 729)*

मत्स्याक्षी ग्राहिणी शीतकुष्ठपित्तकफास्रजित् ।
लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 266)*

# मेथी (मेथिका)

मेथिका कटुरुष्णा च रक्तपित्तप्रकोपनी ।
अरोचकहरा दीप्तिकरी वातप्रणाशिनी ।।

*(ध० नि० सुवर्णादिवर्ग 100)*

मेथिका चातितिक्तोष्णा वमिवातकफापहृत् ।
वचायुर्बुद्धिस्मृतिदा कफवातामभूतहृत् ।।

*(सो० नि० 2, 2, 260)*

मेथिकामेथिनी मेथी दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च ज्योतिर्गन्धफला तथा ।।
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ।।
मेथिका वातशमनीश्लेष्मघ्नीज्वरनाशिनी ।

*(भा० प्र० हरीतक्यादि वर्ग 93-94)*

मेथिका कटुरुष्णा च रक्तपित्तप्रकोपणी ।
अरोचकहरा दीप्तिकरा वातघ्नदीपनी ।।

*(रा० नि० पिप्पल्यादि वर्ग 69)*

# मूलकम्

बालं दोषहरं, वृद्धं त्रिदोषं, मारुतापहम् ।
स्निग्धसिद्धं, विशुष्कं तु मूलकं कफवातजित् ।।

*(च० सू० 27/168)*

कटुतिक्तरसा हृद्या रोचनी वह्निदीपनी ।
सर्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका ।।
महत्तद्गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत् ।
तदेव स्नेहसिद्धं तु पित्तनुत् कफवातजित् ।।
त्रिदोषशमनं शुष्कं विषदोषहरं लघु ।
विष्टम्भि वातलं शाकं शुष्कमन्यत्र मूलकात् ।।
पुष्पं च पत्रं च फलं तथैव यथोत्तरं ते गुरवः प्रदिष्टाः ।
तेषां तु पुष्पं कफपित्तहन्तृ फलं निहन्यात् कफमारुतौ तु ।।

*(सु० सू० 46/240-243)*

यद्बालमव्यक्तरसं किञ्चित्क्षारं सतिक्तकम् ।
तन्मूलकं दोषहरं लघु सोष्णं नियच्छति ।।
गुल्मकासक्षयश्वास व्रणनेत्रगलामयान् ।
स्वराग्निसादोदावर्तपीनसांश्च महत्पुनः ।।
रसे पाके च कटुकमुष्णवीर्यं त्रिदोषकृत् ।।
गुर्वभिष्यन्दि च स्निग्धसिद्धं तदपि वातजित् ।।
वातश्लेष्महरं शुष्कं सर्वम्, आमं तु दोषलम् ।।

*(अ० हृ० सू० 6/102-105(1))*

मूलकं गुरु विष्टम्भि तीक्ष्णमामत्रिदोषनुत् ।
तदेव स्विन्नं स्निग्धं च कटूष्णं कफवातनुत् ।।
त्रिदोषशमनं शुष्कं विषदोषहरं लघु ।

*(ध० नि० करवीरादिवर्ग 31)*

मूलकं वातलं रुच्यं स्वर्योष्णं पाचनं लघु ।।

(म० नि० शाकवर्ग 7/66)

बालमूलकमत्यल्पक्षारं तिक्तोषणं लघु ।
रोचनं दीपनं स्वर्यमुष्णं हृद्यंत्रिदोषजित् ।।
निहन्याद्दद्रुशूलामकोठोदावर्तपीनसान् ।
गुल्मकासक्षयश्वासव्रणनेत्रजलामयान् ।
महदामं कटु स्वादु रसे पाके त्रिदोषकृत् ।
रूक्षं विदाहि तीक्ष्णोष्णमुत्क्लेशि स्तम्भि गुर्वपि ।।
तदेव स्निग्धसिद्धं तु दोषत्रयनिबर्हणम् ।
शुष्कं लघु हरेच्छोफं विषं दोषत्रयं तथा ।।
तत्पुष्पं कफपित्तघ्नं फलं तु कफवातजित् ।

(कै० नि० ओषधिवर्ग 669-674(1))

मूलकं तीक्ष्णमुष्णञ्च कटूष्णं ग्राहि दीपनम् ।
दुर्नामगुल्महृद्रोगवातघ्नं रुचिदं गुरु ।।

(रा० नि० मूलकादिवर्ग 52)

मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् ।
शालामर्कटकं विस्रं शालेयं मरुसम्भवम् ।।
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका ।
नेपालमूलकं चान्यत्तद्भवेद्गजदन्तवत् ।
लघुमूलं कटूष्णं स्याद्रुच्यं लघु च पाचनम् ।
दोषत्रयहरं स्वर्यं ज्वरश्वासविनाशनम् ।।
नासिकाकण्ठरोगघ्नं नयनामयनाशनम् ।।
महत्तदेव रूक्षोष्णं गुरुदोषत्रयप्रदम् ।।
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ।।

(भा० प्र० नि० शाकवर्ग 99-103)

# मुरा (मूलम्)

मुरा गन्धवती दैत्या गन्धाढ्या गन्धमालिनी ।
सुरभिर्भूरिगन्धा च कुटी गन्धकुटी स्मृता ।।
मुराऽत्यन्तं भवेच्छीता तिक्ता सुरभिगन्धिनी ।
क्षिणोति क्षतपुञ्जांश्च पित्तशान्तिं नियच्छति ।।

*(ध० नि० चन्दनादिवर्ग 66-67)*

मुरा गन्धवती दैत्या गन्धाढ्या सुरभिः कुटिः ।
मुरा शीता लघुः कुष्ठग्रहपित्तानिलास्रजित् ।।

*(म० नि० कर्पूरादिवर्ग 54)*

मुरा गन्धवती दैत्या हृद्या गन्धकुटा कुटी ।
भूरिगन्धा च सुरभिर्गन्धाढ्या गन्धमादनी ।।
मुरा तिक्ता हिमा स्वाद्वी लघ्वी पित्तनिलापहा ।
ज्वरासृग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी ।।

*(कै० नि० ओषधिवर्ग 1386-1387)*

मुरा तिक्ता कटुः शीता कषाया कफपित्तहृत् ।
श्वासासृग्विषदाहार्त्तिभ्रममूर्च्छातृषापहा ।।

*(रा० नि० चन्दनादिवर्ग 132)*

मुरा गन्धकुटी दैत्या सुरभिः शालपर्णिका ।
मुरा तिक्ता हिमा स्वाद्वी लघ्वी पित्तनिलापहा ।।
ज्वरासृग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी ।।

*(भा० प्र० नि० कर्पूरादिवर्ग 97-98)*

# मूर्वा

मूर्वा मधुरसा देवी पृथक्पर्णी त्रिपर्ण्यपि ।
देवश्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा ।।
मूर्वा स्वादुरसा चोष्णा हृद्रोगकफवातजित् ।
कुष्ठकण्डूवमीमेहविषमज्वरनाशिनी ।।

*(ध० नि० गुडूच्यादिवर्ग 13-14)*

मूर्वा मुरंगिका देवी देवीश्रेणी पृथक्त्वचा ।
मधुस्रवा मधुरसाऽतिरसा पीलुपर्णिका ।।
मूर्वा स्वादुः स्वादुपाका गुरूष्णा तिक्तका सरा ।
जयेत् त्रिदोषकुष्ठास्रमेदोमेहवमिज्वरान् ।।
मुखशोषं कृमिकण्डूतृष्णापित्तास्रहृद्गदान् ।
मूर्वाकन्दस्तु कृमिहृत् विषघ्नो गुदकीलहा ।

*(कै० नि० ओषधिवर्ग 785-787)*

मूर्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधुलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।।
मूर्वा सरा गुरुः स्वादुस्तिक्ता पितास्रमेहनुत् ।
त्रिदोषतृष्णाहृद्रोगकण्डूकुष्ठज्वरापहा ।।

*(भा० प्र० गुडूच्यादिवर्ग 244-245)*

# नागकेशरः

चरके रक्तार्शांसि .... केशरनवनीतशर्कराभ्यासात् ... अर्शांस्यपयान्ति रक्तानि ।

*(च० चि० 14/210)*

सुश्रुते एलादिगणे, अञ्जनादिगणे, प्रियङ्ग्वादिगणे च पठ्यते ।

*(सु० सू० 38/24,42,47)*

नागकेशरमल्पोष्णं लघु तिक्तं कफापहम् ।
बस्तिरुग्विषवातास्रकण्डूघ्नं शोफनाशनम् ।।

*(ध० नि० शतपुष्पादिवर्ग 49)*

नागकेशरमल्पोष्णं लघु तिक्तं कफापहम् ।
वस्तिवातामयघ्नं च कण्ठशीर्षरुजापहम् ।।

*(रा० नि० पिप्पल्यादिवर्ग 178)*

नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ।।
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।।
ज्वरकण्डूतृषास्वेदच्छर्दिहृल्लासनाशनम् ।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ।।

*(भा० प्र० नि० कर्पूरादिवर्ग 70-71)*

# नीली (पत्रम्, मूलम्)

चरके विरेचनद्रव्येषु मूलं पठ्यते ।

*(च० सू० 2/8)*

सुश्रुते अधोभागहरद्रव्येषु मूलं (नीलिनी) पठ्यते ।

*(सु० सू० 39/4)*

नीलिनी नीलिका काला ग्राम्या तूणी विशोधनी ।
तुत्था श्रीफलिका मोचा भारवाहि च रञ्जनी ।।
नीली तिक्ता रसे चोष्णा कटिवातकफापहा ।
केश्या विषोदरं हन्ति वातासृक्कृमिनाशिनी ।

*(ध० नि० गुडूच्यादिवर्ग 232-234)*

नीली तिक्ता रसे पाके सरोष्णा भ्रममोहकृत् ।
कफानिलहरा केश्या प्लीहोदरविषापहा ।।
वातरक्तमुदावर्तमामवातगदं हरेत् ।

*(कै० नि० ओषधिवर्ग 791-792)*

नीली तु कटुतिक्तोष्णा केश्या कासकफामनुत् ।
मरुद्विषोदरव्याधि गुल्मजन्तुज्वरापहा ।

*(रा० नि० शताह्वादिवर्ग 83)*

नीली तु नीलिनी तूणी काला दोला च नीलिका ।
नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा ।।
उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान् ।
आमवातमुदावर्त्तं मदं च विषमुद्धतम् ।।

*(भा० प्र० गुडूच्यादिवर्ग 207-209)*

# निम्बः

चरके कण्डूघ्ने महाकषाये (सू० 4/14), वमनद्रव्येषु (सू० 2/6), तिक्तस्कन्धे (वि० 8/150) च पठ्यते ।

.... नैम्बं शाकं ... ।
कफपित्तहरं तिक्तं शीतं कटु विपच्यते ।।

*(च० सू० 27/95)*

सुश्रुते आरग्वधादौ, गुडूच्यादौ, लाक्षादौ च गणे पठ्यते ।

आरग्वधादिरित्येष गणः श्लेष्मविषापहः ।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः ।।

*(सु० सू० 38/7)*

गुडूचीनिम्बकुस्तुम्बरुचन्दनानि पद्मकं चेति ।।
एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ।
हृल्लासारोचकवमीपिपासा दाहनाशनः ।।

*(सु० सू० 38/50-51)*

कषायतिक्तमधुरः कफपित्तार्तिनाशनः ।
कुष्ठकृमिहरश्चैव दुष्टव्रणविशोधनः ।।

*(सु० सू० 38/64-65)*

निम्ब ........ फलतैलानि तीक्ष्णानि लघून्युष्णवीर्याणि कटूनी, कटुविपाकानि सराण्यनिलकफकृमिकुष्ठशिरोरोगापहराणि चेति ।

*(सु० सू० 25/115)*

निम्बस्तिक्तरसः शीतो लघुः श्लेष्मास्रपित्तनुत् ।
कुष्ठ कण्डूव्रणान्हन्ति लेपाहारादिशीलतः ।।
अपक्वं पाचयेच्छोफं व्रणं पक्वं विशोधयेत् ।

*(ध० नि० गुडूच्यादिवर्ग 30)*

निम्बस्तिक्तः कटुः पाके लघुः शीतोऽग्निवातकृत् ।
ग्राह्यहृद्यो जयेत् पित्तकफमेहज्वरकृमीन् ।।
कुष्ठकासारुचिश्वासहृल्लासश्वयथुव्रणान् ।
ग्राहि प्रवालं निम्बस्य रक्तपित्तकफकृमीन् ।।
कुष्ठघ्नं वातजननं नेत्ररोगान् विनाशयेत् ।
तद्वत् पत्राणि निम्बस्य व्रणघ्नानि विशेषतः ।।
शलाका निम्बपत्रस्य कासश्वासविनाशिनी ।
कृमिघ्ना तु वरिष्ठा स्यात् कुष्ठज्वरविनाशिनी ।।

*(कै० नि० ओषधिवर्ग 879-882)*

प्रभद्रकः भवतिशीततिक्तकः कफव्रणकृमिवमिशोफशान्तये ।
बलासभिद्बहुविषपित्तदोषजित् विशेषतो हृदयविदाहशान्तिकृत् ।।

*(रा० नि० प्रभद्रादि वर्ग 10)*

निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत् ।
अहृद्यः श्रमतृट्कासज्वरारुचिकृमिप्रणुत् ।
व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनुत् ।।
निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत् ।
वातलं कटुपाकञ्च सर्वारोचककुष्ठनुत् ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 93, 94, 95)*

# पलाशः

सुश्रुते रोध्रादौ, मुष्ककादौ, अम्बष्ठादौ, न्यग्रोधादौ च गणे पठ्यते ।

*(सु० सू० 38/6, 9, 22, 24)*

किशुकं (पुष्पं) कफपित्तघ्नं ................ ।

*(सु० सू० 46/288)*

.....पलाशतैलानि मधुरकषायाणि कफपित्तप्रशमनानि ।

*(सु० सू० 45/121)*

क्षारश्रेष्ठ पलाशश्च बीजस्नेहः समिद्वरः ।
क्षारश्रेष्ठः कृमिघ्नश्च संग्राही दीपनः सरः ।।
प्लीहगुल्मग्रहण्यर्शोवातश्लेष्मविनाशनः ।।

*(ध० नि० आम्रादिवर्ग 148, 149)*

पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
भग्नसन्धानकृद्दोषग्रहण्यर्शः क्रिमीन् हरेत् ।।

*(म० नि० वटादिवर्ग 39)*

पलाशस्तुवरस्तिक्तः स्निग्धोष्णो दीपनः कटुः ।
सरः सन्धानकृद् वृष्यो जयेद् दोषव्रणकृमीन् ।।

*(कै० नि० ओषधिवर्ग 833)*

पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
भग्नसंधानकृद् दोषग्रहण्यर्शः क्रिमीन् हरेत् ।।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम् ।
वातलं कफपित्तास्रकृच्छ्रजिद् ग्राहि शीतलम् ।।
तृड्दाहशमकं वातरक्तकुष्ठहरं परम् ।
फलं लघूष्णं मेहार्शकृमिवातकफापहम् ।
विपाके कटुकं रूक्षं कुष्ठं गुल्मोदरप्रणुत् ।।

*(भा० प्र० नि० वटादिवर्ग 50-53)*

# पारिभद्रः

सुश्रुते क्षारकल्पे, कृमिरोगे, मूत्राघाते च पठ्यते ।

*(सु० चि० 4/32; उ० 54/26; 58/48)*

निम्बद्रुमो रक्तपुष्पः प्रभद्रः पारिभद्रकः ।
मन्दारकः पारिजातः कण्टकी कण्टकिंशुकः ।।
पारिभद्रोऽनिलश्लेष्मशोथमेदःकृमीन् हरेत् ।
तत्पुष्पं पित्तरोगघ्नं कर्णव्याधिविनाशनम् ।।

*(कै० नि० ओषधिवर्ग 898-899)*

परिभद्रः कटूष्णः स्यात् कफवातनिकृन्तनः ।
अरोचकहरः पथ्यो दीपनश्चापि कीर्तितः ।।

*(रा० नि० शाल्मल्यादिवर्ग 11)*

पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः ।
पारिभद्रोऽनिलश्लेष्मशोथमेदः कृमिप्रणुत् ।
तत्पत्रं पित्तरोगघ्नं कर्णव्याधिविनाशनम् ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 100)*

# पिप्पलीमूलम्

अभयापिप्पलीमूलविश्वैर्वातानुलोमनी (यवागूः) ।

*(च० सू० 2/29)*

चरके दीपनीये, शूलप्रशमने च महाकषाये पठ्यते ।

*(च० सू० 4/6, 45)*

पिप्पलीमूलं दीपनीयपाचनीयानाहप्रशमनानाम् ।

*(च० सू० 25/39)*

पिप्पलीपिप्पलीमूल ...... कटुरोहिणी चेति ।
पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः ।
निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः ।।

*(सु० सू० 38/22-23)*

कटूष्णं पिप्पलीमूलं श्लेष्मसंघातनाशनम् ।
वातोच्छित्तिकरं हन्ति कृमीन्वह्निप्रदीप्तिकृत् ।।

*(ध० नि० शतपुष्पादिवर्ग 76)*

कटूष्णं पिप्पलीमूलं श्लेष्मकृमिविनाशनम् ।
दीपनं वातरोगघ्नं रोचनं पित्तकोपनम् ।।

*(रा० नि० शतपुष्पादिवर्ग 114)*

दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु ।।
रूक्षं पित्तकरं भेदि कफवातोदरापहम् ।
आनाहप्लीहगुल्मघ्नं कृमिश्वासक्षयापहम् ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 64-65)*

# प्लक्ष:

चरके मूत्रसंग्रहणीये महाकषाये पठ्यते ।

*(च० सू० 4/33)*

न्यग्रोधोदुम्बराश्वत्थप्लक्षपद्मादिपल्लवा: ।
कषाया: स्तम्भना: शीता हिता: पित्तातिसारिणाम् ।।

*(च० सू० 27/103)*

न्याग्रोधोदुम्बराशवत्थप्लक्ष ......नन्दीवृक्षश्चेति ।।
न्यग्रोधादिर्गणो व्रण्य: संग्राही भग्नसाधक: ।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ।।

*(सु० सू० 38/48-49)*

प्लक्ष: कटु: कषायश्च शीतलोरक्तपित्तजित् ।
मूर्च्छाभ्रमप्रलापांश्च हरेत् प्लक्षो विशेषत: ।।

*(ध० नि० आम्रादिवर्ग 75)*

पिप्परिस्तुवर: शीतो व्रणयोनिविसर्पनुत् ।
दाहपित्तकफास्त्रघ्नो मेद:पितास्त्रशोफजित् ।।

*(कै० नि० ओषधिवर्ग 437)*

प्लक्ष: कषाय: शिशिरो व्रणयोनिगदापह: ।
दाहपित्तकफास्त्रघ्न: शोथहा रक्तपित्तहृत् ।।

*(भा० प्र० नि० वटादिवर्ग 12)*

# प्रसारणी

चरके वातनाशकतैले पठितः ।

*(च० चि० 28/165)*

सुश्रुते वातनाशकतैले पठितः ।

*(सु० चि० 15/44)*

प्रसारणी गुरुस्तिक्ता सरा सन्धानकृन्मता ।
त्रिदोषशमनी वृष्या तेजः कन्तिबलप्रदा ।।

*(ध० नि० गुडूच्यादिवर्ग 290)*

प्रसारणी गुरूष्णा च तिक्ता वातविनाशिनी ।
अर्शःश्वयथुहन्त्री च मलविष्टम्भहारिणी ।।

*(रा० नि० पर्पटादिवर्ग 38)*

प्रसारणी गुरुर्वृष्या बलसन्धानकृत्सरा ।
वीर्योष्णा वातहृत्तिक्ता वातरक्तकफापहा ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 235)*

# प्रियालः (बीजम्)

चरके श्रमहरे, उदर्दप्रशमने च महाकषाये पठ्यते ।

*(च० सू० 4/16,17)*

गुरूष्णस्निग्धमधुराः सोरुमाणा बलप्रदाः ।
वातघ्ना बृंहणा वृष्याः कफपित्ताभिवर्धनाः ।।
प्रियालमेषां सदृशं विद्यादौष्ण्यं विना गुणैः ।।

*(च० सू० 27/157-158)*

प्रियालतैलं मधुरं गुरुश्लेष्माभिवर्धनम् ।
हितमिच्छन्ति नात्यौष्ण्यात्संयोगे वातपित्तयोः ।।

*(च० सू० 27/291)*

न्यग्रोध ... प्रियाल ... नन्दीवृक्षश्चेति ।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः ।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ।।

*(सु० सू० 38/48-49)*

वातपित्तहरं वृष्यं प्रियालं गुरु शीतलम् ।
प्रियालमज्जा मधुरो वृष्यः पित्तानिलापहः ।

*(सु० सू० 46/156, 205)*

उरुमाणं प्रियालं च बृंहणं गुरु शीतलम् ।
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम् ।।
स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत् ।।

*(अ० हृ० सू० 6/121)*

.................... अनुष्णं तु प्रियालजम् ।
प्रियाालमज्जा मधुरो वृष्यः पित्तानिलापहः ।।

*(अ० हृ० सू० 6/124)*

प्रियालोऽथ खरस्कन्धश्चारो बहुवल्कलः ।
स्नेहबीजश्चापवटो ललनस्तापसप्रियः ।।
वातपित्तहरं वृष्यं प्रियालं गुरु शीतलम् ।
चारस्य तु फलं पक्वं स्वाद्वम्लं दुर्जरं प्रियम् ।।
चारमज्जा समधुरा वृष्या पित्तानिलापहा ।

(ध० नि० आम्रादिवर्ग 65-66)

चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहतृष्णाक्षतापहम् ।।
तन्मज्जा मधुरा वृष्या शुक्रला पित्तवातजित् ।।

(म० नि० फलादिवर्ग 36-37)

प्रियालः कफपित्तघ्नः कषायोऽस्य फलं गुरु ।
स्वाद्वम्लं मधुरं पाके सुस्निग्धं शीतलं सरम् ।।
विष्टम्भि बृंहणं वृष्यं बल्यं श्लेष्मविवर्धनम् ।
जयेत् मारुतपित्तास्रदाहतृष्णाक्षतक्षयान् ।।

(कै० नि० ओषधिवर्ग 395-396)

चारः खद्रुः खरस्कन्धो ललनश्चारकस्तथा ।
बहुवल्कः प्रियालश्च नवद्रुस्तापसः प्रियः ।
स्नेहबीजश्चापवटो भक्षबीजः करेन्दुधा ।
चारस्य च फलं पक्वं वृष्यं गौल्याम्लकं गुरु ।
तद्बीजं मधुरं वृष्यं पित्तदाहार्तिनाशनम् ।

(रा० नि० आम्रादिवर्ग 64-65)

प्रियालस्तु खरस्कन्धश्चारो बहुलवल्कलः ।
राजादनस्तापसेष्टःसन्नकद्रुर्धनुष्पटः ।।
चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहज्वरतृषाऽपहम् ।।
प्रियालमज्जा मधुरो वृष्यः पित्तानिलापहः ।
हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः ।।

(भा० प्र० नि० फलवर्ग 83-85)

# प्रियङ्गुः (पुष्पम्)

चरके सन्धानीये, पुरीषसंग्रहणीये, मूत्रविरजनीये, शोणितास्थापने च महाकषाये पठ्यते ।

*(च० सू० 4/5, 31, 34, 46)*

गन्धप्रियङ्गुः शोणितपित्तातियोगप्रशमनानाम् ।

*(च० सू० 25/40)*

प्रियङ्गुधातकीपुष्पैर्दश पुष्पासवा भवन्ति ।

*(च० सू० 25/49)*

गणौ प्रियङ्ग्वम्बष्ठादौ पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानां चापि रोपणौ ।।

*(सु० सू० 38/22)*

अञ्जन ...... प्रियंगु ..... मधुकं चेति ।
अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः ।।
विषोपशमनो दाहं निहन्त्याभ्यन्तरं भृशम् ।।

*(सु० सू० 38/20)*

प्रियङ्गुः प्रियवल्ली च फलिनी कङ्गुनी प्रिया ।
वृत्रा गोवन्दनी श्यामा कारम्भा वर्णभेदनी ।।
प्रियङ्गुः शीतला तिक्ता मोहदाहविनाशिनी ।
ज्वरवान्तिहरा रक्तमुद्रिक्तं च प्रसादयेत् ।।

*(ध० नि० चन्दनादिवर्ग 16-17)*

प्रियङ्गुः शीतला तिक्ता दाहपित्तास्रदोषजित् ।
वान्तिभ्रान्तिज्वरहरा वक्त्रजाड्यविनाशनी ।।

*(रा० नि० चन्दनादिवर्ग 30)*

प्रियंगुः शीतला तिक्ता तुवराऽनिलपित्तहृत् ।
रक्तातीसारदौर्गन्ध्यस्वेददाहज्वरापहा ।।
गुल्मतृड्विषमेहघ्नी तद्वद् गंधप्रियंगुका ।
तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु ।
विबन्धाध्मान बलकृत्संग्राहि कफपित्तजित् ।।

*(भा० प्र० नि० कर्पूरादिवर्ग 102-104)*

# शालिः (मूलम्)

शीता रसे विपाके च मधुराश्चाल्पमारुताः ।
बद्धाल्पवर्चसः स्निग्धा बृंहणाः शुक्रमूत्रलाः ।।
रक्तशालिर्वरस्तेषां तृष्णाघ्नस्त्रिमलापहः ।
महांस्तस्यानु कलमस्तस्याप्यनु ततः परे ।।

*(च० सू० 27/10,11)*

मधुरा वीर्यतः शीता लघुपाका बलावहाः ।
पित्तघ्नाल्पानिलकफाः स्निग्धा बद्धाल्पवर्चसः ।
तेषां लोहितकः श्रेष्ठो दोषघ्नः शुक्रमूत्रलः ।
चक्षुष्यो वर्णबलकृत् स्वर्यो हृद्यस्तृषापहः ।।
व्रण्यो ज्वरहरश्चैव सर्वदोषविषापहः ।।

*(सु० सू० 46/5-7)*

स्वादुपाकरसाः स्निग्धा वृष्या बद्धाल्पवर्चसः ।
कषायानुरसाः पथ्या लघवो मूत्रला हिमाः ।।
शूकजेषु वरस्तत्र रक्तस्तृष्णात्रिदोषहा ।

*(अ० हृ० सू० 6/4, 5-1)*

शीतो गुरुस्त्रिदोषघ्नो मधुरो गौरषष्टिकः ।
किञ्चित् ततो गुरुस्तस्मादपरो रसपाकतः ।।
महाशालिः परो वृष्यः कलमः श्लेष्मपित्तहा ।

*(ध० नि० सुवर्णादिवर्ग 64)*

शालयो लघवः स्निग्धा मधुरा रसपाकतः ।।
कषायानुरसा हृद्या रुच्या बद्धाल्पवर्चसः ।
शीतला बृंहणा वृष्या लघुपाकातिमूत्रलाः ।।
पित्तघ्नाल्पानिलकफा बल्याः स्वर्याज्वरापहाः ।

*(कै० नि० धान्यवर्ग 1,7,8,9-1)*

कण्डनेन विना शुक्ला हैमन्ताः शालयः स्मृताः ।।
शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्चसः ।
कषाया लघवो रुच्याः स्वर्या वृष्याश्च बृंहणाः ।।
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा ।
रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्ज्वरापहः ।
विषव्रणश्वासकासदाहनुद् वह्निपुष्टिदः ।।

*(भा० प्र० नि० धान्यवर्ग 3,7,15,16-1)*

# शंखपुष्पी

..........समूलपुष्प्याः कल्कः प्रयोज्यः खलु शंखपुष्प्याः ।
आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्धनानि ।।
मेध्यानि चैतानि रसायनानि मेध्या विशेषेण च शंखपुष्पी ।।

*(च० चि० 1-3/30-31)*

तत् सेव्यं शंखपुष्पी च यच्च मेध्यं रसायनम् ।

*(च० चि० 10/62)*

शङ्खपुष्पी कम्बुपुष्पी शङ्खाह्वा कम्बुमालिनी ।
तिलकी शङ्खकुसुमा मेध्या वनविलासिनी ।।
शङ्खिनी कटुतिक्तोष्णा कासपित्तबलासजित् ।
विषापस्मारभूतादीन् हन्ति मेध्या रसायनी ।।

*(ध० नि० करवीरादिवर्ग 101-102)*

शंखपुष्पी सरा मेध्या मता चेतोविकारिणी ।
रसायनी कषायोष्णा स्मृतिदा मोहनाशिनी ।।

*(म० नि० अभयादिवर्ग 77)*

शंखपुष्पी सरा स्वर्या कटुस्तिक्ता रसायनी ।
अनुष्णा वर्णमेधाग्निबलायुःकांतिदा हरेत् ।।
अपस्मारमथोन्मादमनिद्रां च तथा भ्रमम् ।।

*(कै० नि० औषधिवर्ग 1496)*

शंखपुष्पी हिमा तिक्ता मेधाकृत् स्वरकारिणी ।
ग्रहभूतादिदोषघ्नी वशीकरणसिद्धिदा ।।

*(रा० नि० गुडूच्यादिवर्ग 133)*

**शंखपुष्पी तु शंखाह्वा मल्यिकुसुमाऽपि च ।**
शंखपुष्पी सरा मेध्या वृष्या मानसरोगहृत् ।।
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा ।
दोषापस्मारभूताश्रीकुष्ठकृमिविषप्रणुत् ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 269-270)*

# सप्तला

सप्तला चर्मसाह्वा च बहुफेनरसा च सा ।

ते गुल्मगरहृद्रोगकुष्ठशोफोदरादिषु ।
विकासितीक्ष्णरूक्षत्वाद्योज्ये श्लेष्माधिकेषु तु ।।

सप्तलायाश्च मूलानि गृहीत्वा भाजने क्षिपेत् ।।

*(च० क० 11/2-4)*

मूलिन्यः षोडशैः .....सप्तला ........ विरेचने ।

*(च० सू० 1/73, 76-77)*

त्रिवृतां ................ सप्तलां वचाम् ।
.........................................
पक्वाशयगते दोषे विरेकार्थं प्रयोजयेत् ।।

*(च० सू० 2/9-10)*

श्यामा ...... सप्तला ...... चेति ।
उक्तः श्यामादिरित्येष गणो गुल्म विषापहः ।।
आनाहोदरविड्भेदी तथोदावर्तनाशनः ।।

*(सु० सू० 38/29-30)*

श्यामादन्ती ..............................शंखिनीचर्मसाह्वा ।
श्यामाद्यो हन्ति गुल्मं विषमरुचिकफौ हृद्रुजं मूत्रकृच्छ्रम् ।

*(अ० हृ० सू० 15/45)*

सातला शोधनी तिक्ता कफपित्तास्रदोषनुत् ।
शोफोदराध्मानहरा किञ्चिन्मारुतकृद्भवेत् ।।

*(ध० नि० गुडूच्यादिवर्ग 238, 239)*

सातला कटुका पाके वातला शीतलो लघुः ।
तिक्ता शोथकफानाहपित्तोदावर्त्तरक्तजित् ।।

*(म० नि० अभयादिवर्ग 56)*

सातला शीतला तिक्ता तीक्ष्णा पाके कटुर्लघुः ।।
हृद्याऽनिलं प्रकुरुते हरते हृद्रुजं कफम् ।
पित्तोदावर्तकुष्ठाशोंगुल्मोदरगरं विषम् ।।
आनाहकृमिशोफामारुचीरुभयशोधनी ।।

*(कै० नि० ओषधिवर्ग 923-924)*

सातला कटुका पाके वातला शीतला लघुः ।
तिक्ता शोफकफानाहपित्तोदावर्तरक्तजित् ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 77-78)*

सातला कफपित्तघ्नी लघुतिक्तकषायिका ।
विसर्पकुष्ठविस्फोटव्रणशोफनिकृन्तनी ।।

*(रा० नि० शताह्वादिवर्ग 195)*

# शताह्वा

शतपुष्पा मिशिर्घोषा पीतिका माधवी शिफा ।
अतिच्छत्रा त्ववाक्पुष्पी शताह्वा कारवी स्मृता ।।

शताह्वा कटुका तिक्ता स्निग्धोष्णा श्लेष्मवातजित् ।
ज्वरनेत्रव्रणान्हन्ति वस्तिकर्मणि शस्यते ।।

*(ध० नि० शतपुष्पादिवर्ग 1-2)*

शतपुष्पा कटुस्तिक्ता तीक्ष्णोष्णा दीपनी लघुः ।।
पित्तला कफवातघ्नी मेध्या स्निग्धा ज्वरापहा ।
निहन्ति शूलदाहाक्षिरोगतृष्णावमिव्रणान् ।।

*(कै० नि० ओषधिवर्ग 1190-91)*

शताह्वा तु कटुस्तिक्ता स्निग्धा श्लेष्मातिसारनुत् ।
ज्वरनेत्रव्रणघ्नी च वस्तिकर्मणि शस्यते ।।

*(रा० नि० शताह्वादिवर्ग 13)*

शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहितच्छत्रिकाऽपि च ।।

शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ।
उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत् ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 89-90)*

# शिग्रुः (पत्रम्)

चरके स्वेदोपगे, शिरोविरेचनोपगे च महाकषाये पठ्यते ।

*(च० सू० 4/22, 27)*

यवानी चार्जकश्चैव शिग्रु शालेयमृष्टकम् ।
हृद्यान्यास्वादनीयानी पित्तमुत्क्लेशयन्ति च ।।

*(च० सू० हरितवर्ग 27/167)*

कटुः सक्षारमधुरः शिग्रुस्तिक्तोऽथ पिच्छिलः ।
मधुशिग्रुः सरस्तिक्तः शोफघ्नो दीपनः कटुः ।।

*(सु० सू० 46/237)*

कुठेरशिग्रु .... प्रभृति ग्राहि शालनम् ।
विदाहि कटु रूक्षोष्णं हृद्यं दीपनरोचनम् ।।
दृक्शुक्रक्रिमिहृत्तीक्ष्णं दोषोत्क्लेशकरं लघु ।

*(अ० हृ० सू० 6/106-107)*

शिग्रुस्तिक्तः कटुश्चोष्णः कफशोफसमीरजित् ।
कृम्यामविषमेदोघ्नो विद्रधिप्लीहगुल्मनुत् ।।

*(ध० नि० करवीरादिवर्ग 36-38)*

शिग्रुस्तीक्ष्णो लघुर्ग्राही वह्निदः कफवातजित् ।
तीक्ष्णोष्णो विद्रधिप्लीहव्रणघ्नो रक्तपित्तकृत् ।।

*(म० नि० शाकवर्ग 72)*

शिग्रुश्च कटुतिक्तोष्णस्तीक्ष्णो वातकफापहः ।
मुखजाड्यहरो रुच्यो दीपनो व्रणदोषनुत् ।।

*(रा० नि० मूलकादिवर्ग 61)*

शिग्रुपत्रभवं शाकं रुच्यं वातकफापहम् ।
कटूष्णं दीपनं पथ्यं कृमिघ्नं पाचनं परम् ।।

*(रा० नि० मूलकादिवर्ग 71)*

शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः ।
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् ।।
संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः ।
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन् ।।
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान्हरेत् ।
शिग्रुवल्कलपत्राणां स्वरसः परमार्तिहृत् ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 105-109)*

# स्थूलैला

चरके शिरोविरेचनद्रव्येषु , श्वासहरे, अंङ्ग॰मर्दप्रशमने च महाकषाये पठ्यते ।

*(च० सू० 2/3 ; 4/37, 44)*

एलादिको वातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ।।

*(सु० सू० 38/25)*

एलादिको वातकफौ विषं च विनियच्छति ।
वर्णप्रसादनः कण्डूपिटिकाकोठनाशनः ।।

*(अ० हृ० सू० 15/44)*

एला तिक्ता च लघ्वी स्यात्कफवातविषव्रणान् ।
वस्तिकण्ठरुजो हन्ति मुखमस्तकशोधिनी ।।

*(ध० नि० शतपुष्पादिवर्ग 46)*

स्थूलैला रोचनी तीक्ष्णा लघूष्णा कफपित्तजित् ।
हृल्लासविषबस्त्यास्यशिरोरुग्वमिकासनुत् ।।

*(म० नि० कर्पूरादिवर्ग 25-26)*

भद्रैला कटुका पाके रसे पित्ताग्निकृल्लघुः ।
रूक्षोष्णा रोचनी कासकफवातास्रश्वासहा ।
हन्ति हृल्लासतृट्कण्डूशिरोवस्त्यास्यरुग्वमीः ।।

*(कै० नि० ओषधिवर्ग 1343-1344)*

एलाद्वयं शीतलतिक्तमुक्तं सुगन्धि पित्तार्त्तिकफापहारि ।
करोति हृद्रोगमलार्त्तिबस्तिशूलघ्नमत्र स्थविरा गुणाढ्या ।।

(रा० नि० पिप्पल्यादिवर्ग 72)

एला स्थूला च बहुला पृथ्वीका त्रिपुटाऽपि च ।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ।।
स्थूलैला कटुका पाके रसे चानलकृल्लघुः ।
रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासतृषाऽपहा ।
हृल्लासविषबस्त्यास्यशिरोरुग्वमिकासनुत् ।।

(भा० प्र० नि० कर्पूरादिवर्ग 60-62)

# तेजोवती

तेजस्विनी तेजवती तेजोह्वा तेजनीति च ।
अश्वघ्नी वल्कला शीता पारिजाता महौजसी ।।
तेजोह्वा श्लेष्मवातघ्नी रुच्या दीपनपाचनी ।

*(ध० नि० गुडूच्यादिवर्ग 266)*

वामनो रक्तसंग्राही रक्तातीसारहन्मतः ।
तेजिनी कफहृद्रोगमुखदंतादिरोगहृत् ।।

*(सोढल नि० 2/246)*

तेजोवती कटुस्तिक्ता रुच्या दीपनपाचनी ।।
उष्णा वातकफश्वासकासहिध्मास्यरोगजित् ।

*(कै० नि० ओषधीवर्ग 1040)*

तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ।।
तेजस्विनी कफश्वासकासास्यामयवातहृत् ।
पाचन्युष्णाकटुस्तिक्तारुचिवह्निप्रदीपनी ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 169-170)*

# तुलसी (पञ्चांगम्, पत्रम्)

चरके श्वासहरे महाकषाये (सुरसा नाम्ना) पठ्यते ।

*(च० सू० 4/37)*

हिक्काकासविषश्वासपार्श्वशूलविनाशनः ।
पित्तकृत्कफवातघ्नः सुरसः (तुलसी) पूतिगन्धहा ।।

*(च० सू० 27/166)*

कफानिलविषश्वासकासदौर्गन्ध्य नाशनः ।
पित्तकृत् पार्श्वशूलघ्नः सुरसः समुदाहृतः ।।

*(सु० सू० 46/233-234)*

सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ।।

*(सु० सू० 38/19)*

हिध्माकासविषश्वासपार्श्वरुक्पूतिगन्धहा ।
सुरसः सुमुखो नातिविदाही गरशोफहा ।।

*(अ० हृ० सू० 6/108)*

तुलसी लघुरुष्णा च रूक्षा कफविनाशिनी ।
कृमिदोषं निहन्त्येषा रुचिकृद् वह्निदीपनी ।।

*(ध० नि० करवीरादि वर्ग 46)*

तुलसी सुरसा गौरी भूतघ्नी बहुमञ्जरी ।
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ।।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ।

*(म० नि० कर्पूरादिवर्ग 107)*

तुलसी तुवरा तिक्ता तीक्ष्णोष्णा कटुपाकिनी
रूक्षा हृद्या लघुः कट्वी दाहपित्ताग्निवर्धिनी
जयेद् वातकफश्वासकासहिध्मावमिकृमीन् ।।
दौर्गन्ध्यपाश्र्वरुक्कुष्ठविषकृच्छ्राश्मदृग्गदान्

*(कै० नि० ओषधिवर्ग 1554,1555)*

तुलसी कटुतिक्तोष्णा सुरभिः श्लेष्मवातजित् ।
जन्तुभूतक्रिमिहरा रुचिकृद्वातशान्तिकृत् ।।

*(रा० नि० करवीरादिवर्ग 150)*

तुलसी सुरसा ग्राम्या सुलभा बहुमञ्जरी ।
अपेतराक्षसी गौरी भूतघ्नी देवदुन्दुभिः ।
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ।।
शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्तिता: ।

*(भा० प्र० नि० पुष्पवर्ग 62-63)*

# वचा

चरके विरेचनद्रव्येषु (सू० 2/8) शिरोविरेचनद्रव्येषु च (वि० 8/158) ; लेखनीये, तृप्तिघ्ने, अर्शोघ्ने, आस्थापनोपगे, शीतप्रशमने, संज्ञास्थापने च महाकषाये पठ्यते ।

*(च० सू० 4/3,11,12,25,42,48)*

सुश्रुते पिप्पल्यादौ, वचादौ, मुस्तादौ च गणे पठ्यते ।

*(सु० सू० 38/10,12,27)*

एतौ वचाहरिद्रादि गणौ स्तन्यविशोधनौ ।
आमातिसारशमनौ विशेषाद्दोषपाचनौ ।।

*(सु० सू० 38/12)*

सुश्रुते ऊर्ध्वभागहरे वर्गे पठ्यते ।

*(सु० सू० 39/6)*

'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
...........कुमाराणां वपुर्मेधाबलबुद्धिविवर्धनाः ।।'

*(सु० शा० 10/68,70)*

'दिवारात्रौ वचाग्रन्थिं मुखे संधारयेत् भिषक् ।
तेन सौख्यं भवेत्तस्य मुखरोगाद्विमुच्यते ।।'

*(हारीत संहिता तृतीयस्थान अ० 46/32)*

वामनी कटुतिक्तोष्णा वातश्लेष्मरुजापहा ।।
कण्ठ्या मेध्या च कृमिहृद्विबन्धाध्मानशूलनुत् ।।

*(ध० नि० शतपुष्पादि वर्ग 7)*

वचा तिक्ता कटुः पाके कटुरुष्णामपाचनी ।
दीपनी वामनी मेध्या जीवनी वाक्स्वरप्रदा ।।
हन्त्युन्मादमपस्मारं रक्षोजन्तुकफानिलान् ।
शूलं विबन्धमाध्मानं शकृन्मूत्रविशोधनी ।।

*(कै० नि० ओषधिवर्ग 1216-1217)*

वचा तिक्ता कटूष्णा च कफामग्रन्थिशोफनुत् ।
वातज्वरातिसारघ्नी वान्तिकृन्मादभूतनुत् ।।

*(रा० नि० पिप्पल्यादिवर्ग 9)*

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा ।।
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत् ।
विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी ।।
अपस्मारकफोन्मादभूतजन्त्वनिलान्हरेत् ।।

*(भा० प्र० नि० हरीतक्यादिवर्ग 101-103)*

'यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः ।
अपस्मारं महाघोरं सुचिरोत्थं जयेद् ध्रुवम् ।।

*(चक्रदत्त अपस्माराधिकार 11)*

# वत्सनाभः

चरके ऐन्द्रीरसायने अल्पमात्रायां प्रयुक्तः ।

*(च० चि० 1/3/23-28)*

चरके मूलजविषे पठितः ।

*(च० चि० 23/11)*

ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता ।

*(सु० क० 2/5 कन्दविषे, 6,12)*

विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ।।
तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ।
योगवाहि त्रिदोषघ्नं बृंहणं वीर्यवर्द्धनम् ।।
(विषं ..... योगवाहि परं वातश्लेष्मजित्सन्निपातहृत् ।

*(ध० नि० मिश्रकादिवर्ग 114-116)*
*(भा० प्र० नि० धात्वादि वर्ग 203.204)*

वत्सनाभोऽतिमधुरः सोष्णो वातकफापहः ।
कण्ठरुक्सन्निपातघ्नः पित्तसन्तापकारकः ।।

*(रा० नि० पिप्पल्यादि वर्ग 222-223)*

यः कन्दो गोस्तनाकारो न दीर्घः पञ्चमाङ्गुलात् ।
न स्थूलो गोस्तनादूर्ध्वं वत्सनाभं तु पाण्डुरम् ।।

*(रस रत्न समुच्चय)*

# विदारी

जीवनो बृंहणो वृष्यः कण्ठ्यः शस्तो रसायने ।
विदारीकन्दो बल्यश्च मूत्रलः स्वादुशीतलः ।।

*(च० सू० 27/118)*

चरके कण्ठ्ये, स्नेहोपग महाकषाये च पठ्यते ।

*(च० सू० 4/9,21)*

मधुरो बृंहणो वृष्यः शीतः स्वर्योऽतिमूत्रलः ।
विदारिकन्दो बल्यश्च पित्तवातहरश्च सः ।।

*(सु० सू० 46/300)*

सुश्रुते विदारिगन्धादिवर्गे, वल्लीपंचमूले, पित्तसंशमनवर्गे च पठ्यते

*(सु० सू० 38/4,72 ; 39/8)*

विदारी शिशिरा स्वादुर्गुरुः स्निग्धा समीरजित् ।
पित्तास्रजित्तथा बल्या वृष्या चैवप्रकीर्तिता ।।

*(ध० नि० गुडूच्यादिवर्ग 147-148)*

विदारी बृंहणी वृष्या सुस्निग्धा शीतला गुरुः ।।
मधुरा मूत्रला स्वर्या स्तन्यवर्णबलप्रदा ।
पित्तानिलास्रदाहघ्नी जीवनीया रसायनी ।।

*(कै० नि० ओषधिवर्ग 1583, 1584)*

विदारी मधुरा शीता गुरुः स्निग्धाऽस्रपित्तजित् ।
ज्ञेया च कफकृत्पुष्टिबल्या वीर्यविवर्द्धिनी ।।

*(रा० नि० मूलकादिवर्ग 101)*

विदारी मधुरा स्निग्धा बृंहणी स्तन्यशुक्रदा ।।
शीता स्वर्या मूत्रला च जीवनी बलवर्णदा ।
गुरुःपित्तास्रपवनदाहान् हन्ति रसायनी ।।

*(भा० प्र० नि० गुडूच्यादिवर्ग 181,182)*

# यवः (फलम्)

रूक्षः शीतोऽगुरुः स्वादुर्बहुवातशकृद्यवः ।
स्थैर्यकृत्सकषायस्तु बल्यः श्लेष्मविकारनुत् ।।
हृत्पाण्डुग्रहणीदोषप्लीहानाहगलग्रहान् ।
कासं कफजमर्शांसि यावशूको(क्षार) व्यपोहति ।

*(च० सू० 27/18,300)*

यवः कषायो मधुरो हिमश्च कटुर्विपाके कफपित्तहारी ।
व्रणेषु पथ्यतिलवच्च नित्यं प्रबद्धमूत्रो बहुवातवर्चाः ।।
स्थैर्याग्निमेधास्वरवर्णकृच्च सपिच्छिलः स्थूलविलेखनश्च ।
मेदोमरुत्तृड्हरणोऽतिरूक्षः प्रसादनः शोणितपित्तयोश्च ।।

*(सु० सू० 27/41-42)*

रुक्षः शीतो गुरुः स्वादुः सरो विड्वातकृद्यवः ।।
वृष्यः स्थैर्यकरो मूत्रमेदःपित्तकफाञ्जयेत् ।
पीनसश्वासकासोरुस्तम्भकण्ठत्वगामयान् ।।

*(ध० नि० सुवर्णादिवर्ग (धान्यानि) 67-68)*

यवः कषायो मधुरः सुशीतलः प्रमेहजित्तिक्तकफापहारकः ।
अशूकमुण्डस्तु यवो बलप्रदो वृष्यश्च नृणां बहुवीर्यपुष्टिदः ।।

*(रा० नि० शाल्यादिवर्ग 70)*

यवः कषायो मधुरः शीतलो लेखनो मृदुः ।
व्रणेषु तिलवत्पथ्यो रुक्षो मेधाऽग्निवर्धनः ।।
कटुपाकोऽनभिष्यन्दी स्वर्यो बलकरो गुरुः ।
बहुवातमलो वर्णस्थैर्यकारी च पिच्छिलः ।।
कण्ठत्वगामयश्लेष्मपित्तमेदःप्रणाशनः ।
पीनसश्वासकासोरुस्तम्भलोहिततृट्प्रणुत् ।।

*(भा० प्र० नि० धान्यवर्ग 28-30)*

# यवासकः

चरके अर्शोघ्ने, तृष्णानिग्रहणे महाकषाये च धन्वयासक नाम्ना तथा दुरालभा नाम्ना हिक्कानिग्रहणे, कासहरे महाकषाये च पठ्यते

*(च० सू० 4/12,29,30,36)*

कषायमधुरा शीता सतिक्ता यासशर्करा ।

*(च० सू० 27/238.2)*

यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति ।

*(सु० सू० 45/167)*

यवासकः स्वादुतिक्तो ज्वरतृड्रक्तपित्तनुत् ।

*(ध० नि० गुडूच्यादिवर्ग 22, 23)*

धन्वयासो हिमस्तिक्तः कषायो मधुरो लघुः ।।
सरो निहन्ति पित्तास्रकफमेदोमदभ्रमान् ।
विसर्पकुष्ठवातास्रतृष्णाकासवमिज्वरान् ।।

*(कै० नि० ओषधिवर्ग 985-986)*

यासो मधुरतिक्तोऽसौ शीतः पित्तार्तिदाहजित् ।।
बलदीपनकृत्तृष्णा कफछर्दिविसर्पजित् ।।

*(रा० नि० शताह्वादिवर्ग 43,46)*

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ।।
गान्धारी कच्छुराऽनन्ता कषाया हरिविग्रहा ।
यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः ।।
कफमेदोमदभ्रान्ति पित्तासृक्कुष्ठकासजित् ।।
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः ।

*(भा० प्र० नि० गुडूच्यादिवर्ग 211-214)*